Thus अपरेधतुः, अपरेधुः, अपरेधिथ, but रराधतुः, रराधुः, रराधिथ in any other senses than that of 'hurting.' In this sûtra the *long* आ,of राध is to be replaced by ए, the anuvritti of short अ (अतः VI. 4. 120) is therefore not appropriate here. We should either read the anuvritti of आ from VI. 4. 112, or we should read the word एकहलमध्ये in this way "in राध् *whatever* stands between two simple consonants is replaced by ए".

16. √râdha, to accomplish, complete.

Pre. राध्नोति । राध्नुतः । राध्नुवन्ति । राध्नुवः । Per. रराध । रराधतुः or रेधतुः । रेधुः or रराधुः । रराधिथ or रेधिथ । I Fut. राद्धा । II Fut. रात्स्यति । Impera. राध्नोतु । राध्नुहि । Imper. अराध्नोत् । Poten. राध्नुयात् । Bene. राध्यात् Aor. अरात्सीत् । अराद्धम् । अरात्सुः । Condi. अरात्स्यत् । Pass राध्यते । Causa. राधयति । Aor. अरीरधत् Desid. रिरात्सति । Inten. राराध्यते ।

17. √sâdha, to complete, finish.

Pre. साध्नोति । Per. ससाध । ससाधतुः । ससाधुः । ससाधिथ । ससाधिव I Fut. साद्धा । II Fut. सात्स्यति । Impera. साध्नोतु । Imper. असाध्नोत् । Poten. साध्नुयात् । Bene. साध्यात् । Aor. असात्सीत् । असाद्धाम् । Condi. असात्स्यत् । Causa. साधयति । Aor. असीषधत् । Desid सिषात्सति । Inten. सासाध्यते । yañluk सासाद्धि । Nouns: साधुः साधनः

**अथ द्वावनुदात्तेतौ**

The two following roots are anudâttet.

**अशू १८ व्याप्तौ संघाते च ।**

अश्नुते ।

18. √aśû, to pervade. 2. to accumulate.

The Present is अश्नुते । In the Perfect, न is inserted after the long आ of the reduplicate, by the following sûtra.

**२५३३ । अश्नोतेश्च । ७ । ४ । ७२ ।**

**दीर्घादभ्यासादवर्णात्परस्य नुट् स्यात् । आनशे । अशिता-अष्टा । अशिष्यते-अक्ष्यते । अश्नुवीत । अशीष्ट-अक्षीष्ट । आशिष्ट-आष्ट । आक्षाताम् ।**

2533. After the lengthened आ of the reduplicate of अश् (अश्नोति), comes the augment नुट् (न) before the short अ of the root in the Perfect

This applies to a case where the root does not contain a double consonant. Thus आनशे, आनशाते, आनशिरे ॥ The rule applies to अश् of the Svâdi 18 and not to अश् of the Kryâdi 51 ; there we have आश, आशतुः, आशुः ॥

18. √aśû, 1. to pervade 2. to heap, accumulate.

Pre अश्नुते । अश्नुवाते । अश्नुवते । अश्नुषे । अश्नुध्वे । अश्नुवे । अश्नुवहे । Per. आनशे । आनशाते । आनशिरे or आनशे । आनशिध्वे or आनड्ढ्वे । आनशिवहे or आनश्वहे । आनशिमहे or आनश्महे I Fut. अष्टा । अशिता । II Fut. अक्ष्यते । or अशिष्यते । Impera. अश्नुताम् । अश्नुष्व । Imper. आश्नुत । आश्नुथाः । आश्नुवि । Poten अश्नुवीत । अश्नुवीथाः । Bene अशिषीष्ट । अक्षीष्ट । Aor. आशिष्ट or आष्ट । आशिषाताम् आक्षाताम् । Condi आक्ष्यत । आशिष्यत । Causa. आशयते । Aor. आशिशत् । Desid आशिशिषते । Inten. आशाश्यते । yañ luk आशष्टि । Pass. अष्टः । Act. अष्टवान् । Ger. अष्ट्वा or अशित्वा । Nouns:—आशिवकः । आशुः । श्वशुरः । अश्नम् । अश्रुम् । अश्वः । अक्षः । अक्षि । अक्षि ।

**ष्टिघ १९ आस्कन्दने ।**

**स्तिघ्नुते । तिष्टिघे । स्तेघिता ।**

19. √ṣhṭigha, to assail, attack.

Pre. स्तिघ्नुते । Per तिष्टिघे । I Fut स्तेघिता । II Fut. स्तेघिष्यते । Impera. स्तिघ्नुताम् । Imper. अस्तिघ्नुत । Poten. स्तिघ्नुवीत । Bene. स्तेघिषीष्ट । Aor. अस्तेघिष्ट । Condi. अस्तेघिष्यत । Causa. स्तेघयति Aor. अतिष्टिघत् । Desid. तिष्टिघिषते । तिष्टेघिषते । Inten तेष्टिघ्यते yañ luk तेष्टिघीति or तेष्टेग्धि । Ger स्तिघित्वा । स्तेघित्वा ।

**अथ आ गणान्तात् परस्मैपदिनः ॥**

All the roots up to the end of this class are Parasmaipadins.

**तिक २० तिग २० क । गतौ च ।**

**चादास्कन्दने । तिक्नोति । तिग्नोति ।**

20. √tika 20(a) √tiga to go, attack, assail. By force of the letter च the meaning to assail is also taken here.

Pre. तिक्नोति । Per. तितेक । तितेकिथ । तितिकिव । I Fut. तेकिता । II Fut. तेकिष्यति । Impera. तिक्नोतु । Imper. अतिक्नोत् । Poten. तिक्नुयात् । Bene. तिक्यात् । Aor. अतेकीत् । Condi. । अतेकिष्यत् । Causa. तेकयति Aor. अतीतिकत् । तैकायनिः Desid. तितेकिषति । Inten. तेतिक्यते । yañ luk. तेतिकीति । Nouns:—तिकः तैकायनः । तिकवितवाः ।

20. √tiga to go, to attack, assail.

Pre. तिग्नोति । Per. तितेग । I Fut. तेगिता । II Fut. तेगिष्यति । Impera. तिग्नोतु । Imper. अतिग्नोत् । Poten. तिग्नुयात् । Bene. तिग्यात् । Aor. अतेगीत् । Condi. अतेगिष्यत् । Causa. तेगयति । Desid. तितेगिषति । Inten. तेतिग्यते ।

**षघ २१ हिंसायाम् ।**

**सघ्नोति ।**

21. √shagha, to hurt, injure, kill.

Pre. सघ्नोति । Per. ससाघ । सेघतुः । सेघिथ । सेघिव । I Fut. सघिता । II Fut. सघिष्यति । Impera. सघ्नोतु । Imper. असघ्नोत् । Poten. सघ्नुयात् । Bene. सघ्यात् । Aor. असाघीत् or असघीत् । Condi. असघिष्यत् । Causa. साघयति । Aor असीषघत् । Desid. सिसघिषति । Inten. सासघ्यते । yaṅ luk. सासघीति । सासग्धि ।

**ञिधृषा २२ प्रागल्भ्ये ।**

**धृष्णोति । दधर्ष । धर्षिता ।**

22. √ñidhṛishâ, to be proud or over-bearing.

Pre. धृष्णोति । Per. दधर्ष । दधृषतुः । दधर्षिथ । दधर्षिव । I Fut धर्षिता । II Fut. धर्षिष्यति । Impera. धृष्णोतु । Imper. अधृष्णोत् । Poten. धृष्णुयात् । Benedi धृष्यात् । Aor. अधर्षीत् । Condi. अधर्षिष्यत् । Causa धर्षयति । Aor. अदीधृषत् । अदधर्षत् । Desid. दिधर्षिषति । Inten. दरिधृष्यते । yaṅ luk. दरीधृषीति । दरिधृष्टि । Part. Pass. धृष्टः । Act. धृष्टवान् । Ger. धर्षित्वा । Noun :— दधृक् ।

**दम्भु २३ दम्भने ।**

**दम्भनं दम्भः । दभ्नोति । ददम्भ । 'श्रन्थिग्रन्थिदम्भिस्वञ्जीनां लिटः कित्वं वा' इति व्याकरणान्तरमिहाप्याश्रीयते इत्युक्तम् । 'अनिदिताम्–' (४१५) इति नलोपः । तस्याभीयत्वाद-सिद्धत्वेन एत्वाभ्यासलोपयोरप्राप्तौ । * दम्भेश्च एत्वाभ्यासलोपौ वक्तव्यौ * । देभतुः । ददम्भतुः । इदं कित्वं पिदपिद्विषयकमिति सुधाकरादयः । तन्मते तिप्सिप्मिप्सु । देभ । देभिथ । 'देभ' इति रूपान्तरं बोध्यम् । अपिद्विषयकमिति न्यासकारादिमते तु । ददम्भ । ददम्भिथ । ददम्भेत्येव । दभ्यात् ।**

23. √dambhu, to deceive, cheat, to injure, hurt. Thus the Present is दभ्नोति । Perfect ददम्भ । We have already mentioned under S. 2397, that according to a certain Grammar (?) the affixes of the Perfect are optionally कित् after the roots śranth, granth, dambh, and svañj. That rule is to be adopted here. The nasal is elided by S. 415. This elision being âbhîya (because taught by VI. 4. 24 which occurs in the subdivision of असिद्धवदत्राभात् VI. 4. 22. S. 2183), is asiddha and so there can be no ए change or elision of the reduplicate in the Perfect. Hence the following vartika. "The ए change and the elision of abhyâsa take place with regard to this root dambha by the sûtra VI. 4. 120 S. 2260." Thus देभतुः । When not कित्, we have ददम्भतुः ।

According to Sudhâkara and others the कित् taught by the above, applies to all affixes of the Perfect, whether they be पित् or non-पित् । In their opinion, even in the singulars तिप्, सिप् and मिप् we have देभ, देभिथ and देभ । According to Nyâsakâra and others, the कित् taught by the above rule is con-

fined to non-पित् affixes; therefore the singulars are 3. ददम्भ, 2. ददम्भिथ and 1. ददम्भ ।

Pre. दभ्नोति । The nasal is elided by S. 415. Per. ददम्भ or देभ । देभतुः or ददम्भतुः । ददम्भुः or देभुः । ददम्भिथ or देभिथ । देभथुः or ददम्भथुः । ददम्भ or देभ । ददम्भ or देभ । देभिव । I Fut. दम्भिता । II Fut. दम्भिष्यति । Impera. दभ्नोतु । Imper. अदभ्नोत् । Poten. दभ्नुयात् । Bene. दभ्यात् । Aor. अदम्भीत् । Condi. अदम्भिष्यत् । Causa. दम्भयति । Aor. अददम्भत् । Desid. दिदम्भिषति । धिप्सति । धीप्सति । VII. 4. 56. S. 2621. Inten. दादभ्यते । yaṅ luk दादम्भि । Past Pass. दब्धः Act. दब्धवान् । Ger. दम्भित्वा or दब्ध्वा ।

ऋधु २४ वृद्धौ ।

24. √ṛidhu, to prosper, flourish, grow.

Pre. ऋध्नोति । Per. आनर्ध । आनृधतुः । आनर्धिथ । आनृधिव । I Fut. अर्धिता । II Fut. अर्धिष्यति । Impera. ऋध्नोतु । Imper. आर्ध्नोत् । Poten. ऋध्नुयात् । Bene. ऋध्यात् । Aor. ऋधत् as मा भवान् ऋधत् । Condi. आर्धिष्यत् । Causa. आर्धयति । Aor. आर्दिधत् । Desid. अर्दिधिषति or ईर्त्सति । Past. Pass. ऋद्ध । Ger. अर्धित्वा or ऋद्ध्वा ।

तृप २५ प्रीणने ।

क्षुभ्नादित्वाण्णत्वं न । तृप्नोति ।

25. √tṛipa, to be pleased or satisfied. Some read this root here. The न is not changed to ण as it is considered to belong to the kshubhṇâdi class.

Pre. तृप्नोति । Per. ततर्प । ततृपतुः । ततर्पिथ or ततर्प्थ or ततृप्थ । ततृपथुः । ततृप । ततर्प । ततृपिव । I Fut. तर्पिता or तर्प्ता or त्रप्ता । II Fut. तर्पिष्यति or तर्प्स्यति or त्रप्स्यति । Impera. तृप्नोतु । Imper. अतृप्नोत् । Poten. तृप्नुयात् । Benedi. तृप्यात् Aor. अतर्प्सीत् or अतृपत् । अतर्पिषीष्टाम् or अतृपताम् ।

२५३३ । क । छन्दसि ।

आ गणान्तादधिकारोऽयम् ।

2533, A. The roots given here-after up to the end of the chapter are found employed in the Chhandas literature only.

This is an adhikâra gaṇa sûtra and exerts its influence up to the end of the chapter.

अह २६ व्याप्तौ ।

अह्नोति ।

26. √aha, to pervade.

Pre. अह्नोति ।

दघ २७ घातने पालने च ।

दघ्नोति ।

27. √dagha, 1. to kill, hurt ; 2. to protect.

Pre. दघ्नोति ।

## चमु २८ भक्षणे

चम्नोति ।

28. √chamu to eat.

Pre. चम्नोति ।

## रि २९ क्षि ३० चिरि ३१ जिरि ३२ दाश ३३ दृ ३४ हिंसायाम् ।

रिणोति । क्षिणोति । अयं भाषायामपीत्येके । 'न तज्जयः शत्रुभूतां क्षिणोति' । ऋक्षीत्येक एवाजादिरित्यन्ये । ऋक्षिणोति । चिरिणोति । जिरिणोति । दाश्नोति । दृणोति । वृत् ।

29. √ri, 30√kshi, 31√chiri, 32√jiri, 33√dâśa, 34√dṛi. to hurt kill.

Pre. रिणोति ।

30. √kshi to hurt, kill. Some say that this root is found in the ordinary Sanskrit also. As न तद् यशः शस्त्रभृतां क्षिणोति । Here kshiṇoti is used. So also इमां हृदि व्यायतपातमक्षिणोत् । Some read it as ऋक्षि, as ऋक्षिणोति, and do not read two root रि and क्षि separately, but *one* root ऋक्षि ।

Pre. क्षिणोति ।

31. √chiri to hurt, kill.

Pre. चिरिणोति ।

33. √jiri, to kill, hurt.

Pre. जिरिणोति ।

33. √dâś, to hurt, kill.

Pre. दाश्नोति ।

34. √dṛi, to hurt, kill.

Pre. दृणोति ।

वृत् । End.

इति तिङन्तस्वादिप्रकरणम् ।

Here end the roots of the Svâdi Class.

:o:

## ॥ अथतिङन्त तुदादि प्रकरणम् ॥

# CHAPTER VI.

## TUDADI ROOTS.

## तुद १ व्यथने ।

इतः षट् स्वरितेतः ।

This class of verbs take the vikaraṇa श । The first root is तुद 'to torment'.

Thus तुद्+शप्+ति। Now applies the following sûtra by which श comes to the exclusion of शप्।

## २५३४। तुदादिभ्यः शः। ३। १। ७७।

तुदति-तुदते। तुतोद। तुतोदिथ। तुतुदे। तोत्ता। अतौत्सीत्-अतुत्त।

2534. The affix श is employed after the roots of the Tudâdi class, in denoting the agent when a sârvadhâtuka affix follows.

This debars शप्. The indicatory श makes this affix a sârvadhâtuka affix. As तुद+श+ति=तुद+अ+ति=तुदति (I. 2. 4) 'he pains or torments'.

The root तुद् and the six following roots are svaritet.

1. √tuda, to pain, vex, torment.

Pre. तुदति। तुदतः। तुदन्ति। तुदसि। तुदथः। तुदथ। तुदामि। तुदावः। तुदामः। Per. तुतोद। तुतुदतुः। तुतुदुः। तुतोदिथ। तुतुदथुः। तुतुद। तुतोद। तुतुदिव। तुतुदिम। I Fut. तोत्ता। II Fut. तोत्स्यति। Impera. तुदतु तुदतात्। तुदताम्। तुदन्तु। तुद or तुदतात्। तुदतम्। तुदत। तुदानि। तुदाव। तुदाम। Imper. अतुदत्। अतुदः। अतुदम्। Poten. तुदेत्। तुदेताम्। तुदेयुः। तुदेः। तुदेयम्। Bene. तुद्यात्। तुद्यास्ताम्। Aor. अतौत्सीत्। अतौत्ताम्। (VIII. 2. 26. S. 2281) अतौत्सीः। अतौत्सम्। Condi. अतोत्स्यत्। Causa. तोदयति। अतूतुदत्। Desid. तुतुत्सति। Inten. तोतुद्यते। yañ luk तोतुदीति or तोतोत्ति। Ger. तुत्त्वा। Nouns:—तुत्यम् तोत्रम् अरुंतुदः विधुंतुदः तिलंतुदः तुदती। तुदन्ती।

Atm. Pre. तुदते। तुदेते। तुदन्ते। तुदसे। तुदेथे। तुदध्वे। तुदे। तुदावहे। तुदामहे। Per. तुतुदे। तुतुदाते। तुतुदिरे। तुतुदिषे। तुतुदाथे। तुतुदिध्वे। तुतुदे। तुतुदिवहे। तुतुदिमहे। I Fut. तोत्ता। II Fut. तोत्स्यते Impera.। तुदताम्। तुदेताम्। तुदन्ताम्। तुदस्व। तुदेथां। तुदध्वम्। तुदै। तुदावहै। तुदामहै। Imper. अतुदत। अतुदथाः। अतुदे। Poten. तुदेत। तुदेयाताम्। तुदेरन्। तुदेथाः। तुदेय। तुदेवहि। Bene. तुत्सीष्ट। तुत्सीयास्ताम् (I. 2. 11. S. 2300). Aor. अतुत्त। अतुत्साताम्। Causa. तोदयते। Desid. तुतुत्सते।

## णुद् २ प्रेरणे।

नुदति-नुदते। नुनोद-नुनुदे। नोत्ता।

2. √ṇuda, to send.

Pre. नुदति। प्रणुदति or ते। Per. नुनोद। I Fut. नोत्ता। II Fut. नोत्स्यति। Impera. नुदतु। Imper. अनुदत्। Poten. नुदेत्। Bene. नुद्यात्। Aor. अनौत्सीत्। Condi. अनोत्स्यत् Causa. नोदयति Desid. नुनुत्सति। Inten. नोनुद्यते। Past Pass. नुन्नः। नुत्तः। Act. नुन्नवान्। नुत्तवान्। Ger. नुत्त्वा। Nouns: कालनुदः। शोकापनुदः।

Atm. Pre. नुदते। Per. नुनुदे। I Fut. नोत्ता। II Fut. नोत्स्यते। Impera. नुदताम्। Imper. अनुदत। Poten. नुदेत। Bene. नुत्सीष्ट। Aor. अनुत्त। Condi. अनोत्स्यत। Causa. नोदयते। Desid. नुनुत्सते।

## दिश ३ अतिसर्जने।

अतिसर्जनं दानम्। देष्टा। दिक्षीष्ट। अदिक्षत्-अदिक्षत।

3. √diśa, to give, grant, bestow.

Pre. दिशति। Per. दिदेश। दिदेशिथ। दिदिशिव। I Fut. देष्टा। II Fut. देक्ष्यति। Impera. दिशतु। Imper. अदिशत्। Poten. दिशेत्। Bene. दिश्यात्। Aor. अदिक्षत्।

अदिक्षताम् । अदिक्षन् । अदिक्षः । Condi. अदेक्ष्यत् Causa. देशयति । अदीदिशत् । Desid. दिदिक्षति । Inten, देदिश्यते । yan luk देदिशीति । देदेष्टि । Nouns :—दिक् । dual दिशौ pl. दिशः । प्रतिदिशम् । दिशा दिश्यम् । दैष्टिकः दिष्टिः देशः आदेशः प्रदेशिनी ।

Atm. Pre. दिशते । Per. दिदिशे । दिदिशिरे । दिदिक्षे । दिदिशिवहे । I Fut. देष्टा । II Fut. देक्ष्यते । Impera. दिशताम् । Imper. अदिशत । Poten. दिशेत । Bene. दिक्षीष्ट । Aor. अदिक्षत । अदिक्षाताम् । अदिक्षथाः । अदिक्षि । अदिक्षावहि । Desid. दिदिक्षते ।

## भ्रस्ज ४ पाके ।

'ग्रहिज्या–' (२४१२) इति संप्रसारणम् । सस्य श्चुत्वेन शः । शस्य जश्त्वेन जः । भृज्जति–भृज्जते ।

4. √bhrasja, ' to cook'.

In conjugating this root there is vocalisation of र into ऋ by S. 2412. Then the स is changed to श a letter homogeneous with j ज । Then the श becomes ज by जश् rule. Thus भ्रस्ज्+श+ति=भृस्ज्+श+ति because श is ङित् by I. 2. 4. S. 2234 (VI. 1. 16. S. 2412)=भृश्ज्+श+ति (VIII. 4. 40. S. 111) =भृज्ज्+श+ति (VIII. 4. 53. S. 52)=भृज्जति । Atm. भृज्जते ।

In the Perfect. the following sûtra applies :—

## २५३५ । भ्रस्जो रोपधयो रमन्यतरस्याम् । ६ । ४ । ४७ ।

भ्रस्जे रेफस्योपधायाश्च स्थाने रमागमो वा स्यादार्धधातुके । मित्वादन्त्यादचः परः । स्थानषष्ठीनिर्देशाद्रोपधयोर्निवृत्तिः । बभर्ज । बभर्जतुः । बभर्जिथ–बभर्ष्ठ । बभर्ज्ज । रमभावे बभ्रज्ज । बभ्रज्जतुः । बभ्रज्जिथ । 'स्कोः–' (३८०) इति सलोपः । 'व्रश्च–' (२९४) इति षः । बभ्रष्ठ । बभ्रज्जे । भर्ष्टा–भ्रष्टा । भ्रक्ष्यति–भर्क्ष्यति । * क्ङिति रमागमं बाधित्वा संप्रसारणं पूर्वविप्रतिषेधेन * । भृज्ज्यात् । भृज्ज्यास्ताम् । भर्क्षीष्ट–भ्रक्षीष्ट । अभार्क्षीत्–अभ्राक्षीत् । अभर्ष्ट–अभ्रष्ट ।

2535. **In the room of the र् and the penultimate letter स् of the root भ्रस्ज, there is optionally the substitute रम्, when an ârdhadhâtuka affix follows.**

*Note* :—The र् and स् cease to exist and र takes their place. The substitute having an indicatory म् comes after the final vowel (I. 1. 49). Thus भ्रस्ज+तृ=भर्ज+तृ=भर्ष्टृ the ज being changed to ष by VIII. 2. 36, and त to ट by VIII. 4. 41. The other form will be भ्रष्टा; so also भ्रष्टुम् and भर्ष्टुम्, भ्रष्टव्यम् and भर्ष्टव्यम्, भ्रज्जनम् or भर्ज्जनम् ॥ But भृष्टः and भृष्टवान् by VI. 1. 16, in spite of this rule. The word उपदेश (VI. 4. 37), is understood here also. The rule therefore applies to the simple root bhrasj as originally taught in the Dhatupâṭha, and not to any Derivative root from it. As the Intensive (यङ) is बरीभृज्ज्यते ॥

Thus bhrasj+ṇal=bharj+ṇal. The र् and स् are elided, and in their place is put र् । In other words, the stem before ardhadhâtuka affixes is भर्ज् । Thus we have ब भर्ज । When there is not रम् augment, then we have बभ्रज्ज &c. In this latter case, in second person singular we get बभ्रष्ठ thus बभ्रस्ज्+थ=बभ्रज्+थ (the स is elided by S. 380)=बभ्रष्+थ (ज changed to ष by VIII. 2. 36. S. 294).

*Vârt*:—The vocalisation takes place before कित् and ङित् affix to the exclusion by anticipation of the substitute रम्। As भृज्ज्यात्।

4. √bhrasja, to fry, roast.

Pre. भृज्जति। भृज्जसि। भृज्जामि। Per. बभर्ज्ज। बभ्रज्ज। बभर्ज्जतुः बभ्रज्जतुः। बभर्ज्जुः बभ्रज्जुः। बभर्जिथ or बभर्ष्ठ। बभ्रजिथ or बभ्रष्ठ। बभर्ज्जथुः बभ्रज्जथुः। बभ्रज्ज। बभर्ज्जिव बभ्रज्जिव। I. Fut. भर्ष्टा भ्रष्टा। II. Fut. भ्रक्ष्यति or भर्क्ष्यति। Impera. भृज्जतु। Imper. अभृज्जत्। Poten. भृज्जेत्। भृज्जेयुः। Bene. भृज्ज्यात् भृज्ज्यास्ताम्। Aor. अभार्क्षीत्। अभ्राक्षीत्। अभार्ष्टाम्। अभ्राष्टाम्। अभार्क्षुः। अभ्राक्षुः। अभार्क्षीः। अभार्ष्टम्। अभार्क्षम्। Causa. भर्ज्जयति। Aor. अबभर्ज्जत्। or भ्रज्जयति Aor. अबभ्रज्जत्। Desid. बिभर्क्षति। बिभर्ज्जिषति। बिभ्रक्षति। बिभ्रज्जिषति। Inten. बरीभृज्ज्यते। yañ luk बाभ्रष्टि Past Pass. भ्रष्टः। Act. भ्रष्टवान्। Ger. भृष्ट्वा। Nouns:—भर्ग्यः। भृग्नः। भार्गायणः। भार्गिः। भृगुः। भार्गवः। भृगवः। भ्राष्ट्रम्।

Atm. Pre. भृज्जते। भृज्जसे। भृज्जे। Per. बभर्ज्जे। बभ्रज्जे। बभर्ज्जाते। बभ्रज्जाते। बभर्ज्जिरे। बभ्रज्जिरे। बभर्ज्जिषे। बभ्रज्जिषे। I Fut. भ्रष्टा। भर्ष्टा II Fut. भ्रक्ष्यते or भर्क्ष्यते। Impera. भृज्जताम्। Imper. अभृज्जत। Poten. भृज्जेत। भृज्जेयाताम्। भृज्जेरन्। Bene. भर्क्षीष्ट। भ्रक्षीष्ट। भर्क्षीयास्ताम्। भ्रक्षीयास्ताम्। Aor. अभर्ष्ट। अभ्रष्ट। अभर्क्षातम्। अभ्रक्षाताम्। अभर्ष्टाः। अभर्क्षाथाम्। अभर्ड्ढ्वम्। अभर्क्षि। अभर्क्ष्वहि।

## क्षिप ५ प्रेरणे।

क्षिपति–क्षिपते। क्षेप्ता। अक्षैप्सीत्–अक्षिप्त।

5. √kshipa, to send.

Pre. क्षिपति। A. क्षिपते। Per. चिक्षेप। A. चिक्षिपे। चिक्षेपिथ। A. चिक्षिपिषे। चिक्षिपिव। I Fut. क्षेप्ता। II Fut. क्षेप्स्यति। A. क्षेप्स्यते। Impera. क्षिपतु। A. क्षिपताम्। Imper. अक्षिपत्। A. अक्षिपत। Poten. क्षिपेत्। A. क्षिपेत। Bene. क्षिप्यात्। A. क्षिप्सीष्ट। Aor. अक्षैप्सीत् अक्षैप्ताम्। A. अक्षिप्त। d. अक्षिप्साताम्। Condi. अक्षेप्स्यत् Causa. क्षेपयति। Aor. अचिक्षिपत्। Desid. चिक्षिप्सति। A. चिक्षिप्सते। Inten. चेक्षिप्यते। yañ luk चेक्षिपीति। चेक्षेप्ति।

## कृष ६ विलेखने।

कृषति–कृषते। क्रष्टा–कर्ष्टा। कृष्यात्। कृक्षीष्ट। 'स्पृशमृशकृष–' इति सिज्वा। पक्षे क्सः। सिचि अम्वा। अक्राक्षीत्–अकार्क्षीत्–अकृक्षत्। तङि 'लिङ्सिचौ–' (२३००) इति कित्वादम्न। अकृष्ट। अकृक्षाताम्। अकृक्षत। अकृक्षत। अकृक्षाताम्। अकृक्षन्त।

6. √krisha, to plough, to make furrows.

The Aorist is formed *optionally* by सिच् under a vârtika to sûtra III. 1. 47. S. 2407, to the Bhuadi root √krisha. When सिच् is not added the aorist is formed by क्स (III. 1. 45 S. 2336). When सिच् there is optionally अम् augment. But in the Atmanepada there is no अम् because the सिच् is there कित् under I. 2. 11. S. 2300. Compare Bhuadi कृष No. 1039.

Pre. कृषति। A. कृषते। Per. चकर्ष। A. चकृषे। चकर्षतुः। A. चकृषाते। चकर्षिथ। A. चकृषिषे। चकर्ष चकृषिव I Fut. क्रष्टा। कर्ष्टा II Fut. क्रक्ष्यति। कर्क्ष्यति। A. क्रक्ष्यते or कर्क्ष्यते। Impera. कृषतु। A. कृषताम्। Imper. अकृषत्। A. अकृषत। Poten. कृषेत्। A. कृषेत। P. D. कृषेताम्। A. D. कृषेयाताम्। Bene. कृष्यात्। A. कृक्षीष्ट। Aor. 1. with क्स। अकृक्षत्। अकृक्षताम्। अकृक्षन्। A. अकृक्षत। D. अकृक्षाताम्। pl. अकृक्षन्त। 2. with सिच्।

अकार्षीत् । अकाष्टाम् । अकार्क्षुः । A. अकृष्ट । D. अकृक्षाताम् । pl. अकृक्षत 3. with क्सम् । अक्राक्षीत् । D. अक्राष्टाम् । &c. Causa. कर्षयति । Aor. अचकर्षत् । अचीकृषत् । Desid. चिकृक्षति । Inten. चरीकृष्यते । yaṅ luk चरीकृष्टीति ।

## ऋषी ७ गतौ ।

परस्मैपदी । ऋषति । आनर्ष ।

7. √ṛishî, to go. This root is Parasmaipadi.

Pre. ऋषति । प्रार्षति (VI. 1. 91. S. 74.) Per. आनर्ष । (VII. 4. 70. S. 2248, and VII. 4. 71. S. 2288). आनृषतुः । आनृषुः । आनर्षिथ । आनर्षिव । I Fut. अर्षिता II Fut. अर्षिष्यति । Impera. ऋषतु । Imper. आर्षत् । (VI 1. 90. S. 269). Poten. ऋषेत् । Bene. ऋष्यात् । Aor. आर्षीत् । As मा भवानर्षीत् । The vriddhi is prevented by VII. 2. 4. S. 2268. Causa. अर्षयति । Aor. आर्षिषत् । Desid. अर्षिषिषति । Past. Part. Pass. ऋष्टः । Act. ऋष्टवान् । Ger. अर्षित्वा । Nouns :—ऋषः ।

## जुषी ८ प्रीतिसेवनयोः ।

आत्मनेपदिनश्चत्वारः । जुषते ।

8. √jushî, 1. to be pleased, to enjoy. 2. to devote or attach one self to.

This and the following three roots are Atmanepadis

Pre. जुषते । Per. जुजुषे । जुजुषिषे । I Fut. जोषिता । II Fut. जोषिष्यति । Impera. जुषताम् । Imper. अजुषत । Poten. जुषेत । Bene. जोषिषीष्ट । Aor. अजोषिष्ट । अजोषिषाताम् । Causa. जोषयति । अजूजुषत् । Desid. जुजुषिषते । जुजोषिषते । Inten. जोजुष्यते yaṅ luk जोजोष्टि । Past Pass. जुष्टः । Act. जुष्टवान् । Ger. जुषित्वा । जोषित्वा । Nouns :—जुषत् । जुष्यः । सजूः । D. सजुषौ । pl. सजुषः । जोषम् ।

## ओविजी ९ भयचलनयोः ।

प्रायेणायमुत्पूर्वः । उद्विजते ।

9. √O vijî. This root is generally found preceded by उत् । As उद्विजते । The सेट् affixes are treated as ङित् by the following sûtra.

## २५३६ । विज इट् । १ । २ । २ ।

विजेः पर इडादिः प्रत्ययो ङिद्वत् । उद्विजिता । उद्विजिष्यते ।

**2536. An affix that begins with the augment इट् (VII. 2. 35) is ङित् after the root *vij*., 'to be afraid, to tremble.'**

*Note* :—The root विज् does not strengthen its vowel before the affixes that take the intermediate इ, because those terminations are treated like ङित् affixes. The root विज् belongs to the Tudâdi class. Thus उद्विजिता 'he will be agitated,' उद्विजितुम् 'for the purpose of being agitated.' उद्विजितव्यम् 'ought to be agitated.'

But those affixes, which are not preceded by the augment इट्, are not like ङित्, and they consequently produce their own proper action, such as gunation &c. As उत्+विज्+ल्युट्=उद्वेजनम्, उद्वेजनीयम् 'that which ought to be agitated.'

9. √O vijî, 1. to be afraid. 2. to shake, tremble.

Pre. उद्विजते। Per. उद्विविजे। उद्विविजिषे। I Fut. उद्विजिता। No guṇa. II Fut. उद्विजिष्यते। Impera. उद्विजताम्। Imper. उदविजत। Poten. उद्विजेत। Bene. उद्विजिषीष्ट। Aor. उदविजिष्ट। Causa. उद्वेजयते। Aor. उदवीविजत्। Desid. उद्विविजिषते। Inten. उद्वेविज्यते। yaṅ luk उद्वेविजीति। उद्वेवेक्ति। Past. Pass. उद्विग्नः। Act. उद्विग्नवान्। Ger. उद्विजित्वा।

**ओलजी १० ओलस्जी १० क। व्रीडायाम्।**

लजते। लेजे। लज्जते। ललज्जे।

10. √O lajî, √O lasjî to be ashamed, to blush.

Pre. लजते। Per. लेजे। लेजिषे। I Fut. लजिता। II Fut. लजिष्यते। Impera. लजताम्। Imper. अलजत। Poten. लजेत। Bene. लजिषीष्ट। Aor. अलजिष्ट। Condi. अलजिष्यत Causa. लाजयति। Aor. अलीलजत् Desid. लिलजिषते। Inten. लालज्यते। yaṅ luk लालजीति। लालक्ति। Past. Pass. लग्नः। Act. लग्नवान्। Ger. लजित्वा।

10A. √O lasjî to be ashamed to blush.

Pre. लज्जते। Per. ललज्जे। I Fut. लज्जिता। II Fut. लज्जिष्यते। Impera. लज्जताम्। Imper. अलज्जत। Poten. लज्जेत। Bene. लज्जिषीष्ट। Aor. अलज्जिष्ट। अलज्जिषाताम्। अलज्जिषत। Causa. लज्जयति। Aor. अललज्जत्। Desid. लिलज्जिषते। Inten. लालज्ज्यते। yaṅ luk लालज्जीति। लालक्ति। Part. Ger. लज्जित्वा। Nouns :—लज्जा।

अथ परस्मै पदिनः।

**ओव्रश्चू ११ छेदने।**

'ग्रहिज्या–' (२४१२) । इति संप्रसारणम्। वृश्चति। ववृश्च। ववृश्चतुः। ववृश्चिथ–ववृष्ठ। 'लिट्यभ्यासस्य–' (२४०८) इति संप्रसारणम्। ऋकारस्य अकारः। 'उरत्' (२२४४)। तस्य 'अचः परस्मिन्–' (५०) इति स्थानिवद्भावात् 'न संप्रसारणे–' (३६३) इति वस्योत्वं न। व्रश्चिता–व्रष्टा। व्रश्चिष्यति–व्रक्ष्यति। वृश्च्यात्। अव्रश्चीत्–अव्राक्षीत्।

11. √O vraśchu, to cut.

The व of the root is vocalised to ऋ by VI. 1. 16 S. 2412, because the affix श is ङित्। Thus वृश्चति।

In the Perfect वव्रश्च+णल्=वव्रश्च+णल (vocalisation is by VI. 1. 17 S 2408) =ववश्च+णल् (The ऋ is changed to अ by VII. 4. 66, S 2244) This व is not now vocalised to उ i.e. we have not the form उवृश्च because the अ substitute of ऋ is considered sthanivat to ऋ by I. 1. 57 S. 50. Therefore व being really equivalent to वृ there is no further vocalisation because of the prohibition of VI. 1. 37 S. 363. Thus the Perfect is ववृश्च.

Pre. वृश्चति। Per. ववृश्च। ववृश्चतुः। ववृश्चिथ ववृष्ठ। ववृश्चिव। I Fut. व्रश्चिता। or व्रष्टा। II Fut. व्रक्ष्यति। or व्रश्चिष्यति। Impera. वृश्चतु। Imper. अवृश्चत्। Poten. वृश्चेत्। Bene. वृश्च्यात्। Aor. अव्रश्चीत् or अव्राक्षीत्। अव्रश्चिष्टाम् or अव्राष्टाम्। अव्रश्चिषुः। अव्रश्चीः। अव्रश्चिष्टम्। अव्रश्चिष्ट। अव्रश्चिषम्। Causa. व्रश्चयति। Aor. अववव्रश्चत्। Desid. विव्रश्चिषति; or विव्रक्षति। Inten. वरीवृश्च्यते yaṅ luk, वाव्रष्टि। Dual. वावृष्टः। Past. Pass. वृक्णः Act. वृक्णवान् Ger. व्रश्चित्वा Nouns :—वृक्षः।

**व्यच १२ व्याजीकरणे।**

विचति। विव्याच। विविचतुः। व्यचिता। व्यचिष्यति। विच्यात्। अव्याचीत्–अव्यचीत्। 'व्यचेः कुटादित्वमनसि' इति तु नेह प्रवर्तते। 'अनसि' इति पर्युदासेन कुन्मात्रविषयत्वात्।

12. √Vyacha to deceive.

*Vârtika*:—The root व्यच् 'to deceive,' is also treated like kuṭâdi verbs, except before the affix अस्. As विचिता 'the deceiver', विचितुम् 'for the purpose of deceiving' विचितव्यम् &c. Here there is samprasâraṇa before the ṅit terminations ता, तुम् and तव्यम्, and the य of व्यच् is changed into इ by VI. 1. 16.

But the affix अस् is not ṅit and consequently there is no samprasâraṇa before it. Thus उरुव्यचाः 'an imp.'

By I. 2. 1. S. 2461, all affixes other than those which have an indicatory ञ or ण are treated as ṅit after the roots of the kuṭâdi class. The √vyacha by the above Vârtika, is declared to be a root of the kuṭâdi class. Therefore all affixes after it being ṅit, there ought to have been samprasâraṇa in the Aorist also. But this is not so, because the word असि indicates that the √vyacha is kuṭâdi only before the affixes of the same class as अस, *viz.*, before the कृत् affixes, not before the तिङ् affixes.

Pre. विचति । (S. 2412). Per. विव्याच । विविचतुः । विव्यचिथ । विविचथुः । विविच विव्याच । विविचिव । I Fut. व्यचिता । II Fut. व्यचिष्यति । Impera. विचतु । Imper. अविचत् । Poten. विचेत् । Bene. विच्यात् । Aor. अव्याचीत् or अव्यचीत् । अव्याचिष्टाम् or अव्यचिष्टाम् । Causa व्याचयति । Aor. अविव्यचत् । Desid. विव्यचिषति । Past. Pass. विग्नः or विचितः । Act. विग्नवान् or विचितवान् Ger. विचित्वा Noun :—उरुव्यचाः 'an imp'.

उछि १३ उञ्छे ।

उञ्छति ।

13. √uchhi, to glean, gather bit by bit.

This and the next root are given in the Bhvâdi class also No. 230 and 231.

Pre. उञ्छति ।

उछी १४ विवासे ।

उच्छति ।

14. √uchhî, to abandon, to cease, to finish.

Per. उच्छति ।

ऋच्छ १५ गतीन्द्रियप्रलयमूर्तिभावेषु ।

'ऋच्छत्यृताम्' (२३८३) इति गुणः । द्विहल्ग्रहणस्यानेकहलुपलक्षणत्वान्नुट् । आनर्च्छ । आनर्च्छतुः । ऋच्छिता ।

15. √richha, 1. to go. 2. to fail in faculties. 3. to become hard or stiff.

In the Perfect there is guṇa by VII 4. 15. S. 2383 and there is augment of the नुट् because the words two consonants in VII. 4. 71. S. 2288, include more than two consonants also.

Pre. ऋच्छति । Per. आनर्च्छ । आनर्च्छतुः । आनर्च्छुः । आनर्च्छिथ । आनर्च्छिव । I Fut. ऋच्छिता । II Fut. ऋच्छिष्यति । Impera. ऋच्छतु । Imper. आर्च्छत् । Poten. ऋच्छेत् । Bene. ऋच्छ्यात् । Aor. आर्च्छीत् । (ऋच्छीत् without the augment as in मा

भवानृच्छीत् । ) आर्च्छिष्टाम् । आर्च्छिषम् । Causa. ऋच्छयति । Aorist आर्चिच्छत् । (माभवानृचिच्छत्). Desid. ऋचिच्छिषति । Ger. ऋच्छित्वा ।

**मिछ १६ उत्क्लेशे ।**

उत्क्लेशः पीडा । मिमिच्छ । अमिच्छीत् ।

16. √michha. 1. to hinder, 2. to annoy.

The word 'utklesha' here means pain.

Pre. मिच्छति । Per. मिमिच्छ । मिमिच्छतुः । I Fut. मिच्छिता । II Fut. मिच्छिष्यति । Impera. मिच्छतु । Imper. अमिच्छत् । Poten. मिच्छेत् । Bene. मिच्छ्यात् । Aor. अमिच्छीत् । Causa. मिच्छयति । Aorist अमिमिच्छत् । Desid. मिमिच्छिषति । Inten. मेमिच्छ्यते । yañ luk, मेमिच्छीति । मेमेष्टि ।

**जर्च १७ जर्ज, चर्च १७ क । झर्झ १७ ख । परिभाषणभर्त्सनयोः ।**

17. √jarcha, 17A. √jarja, 17B. √charcha, 17C. √jharjha, 1. to say, 2. to blame.

Pre. जर्जति । चर्चति । झर्झति । Per. जजर्ज । चचर्च । जझर्झ । Nouns :—चर्चिका । जर्जरः । झर्झरः ।

**त्वच १८ संवरणे ।**

· तत्वाच ।

18. √tvacha, to cover.

Pre. त्वचति । Per. तत्वाच । I Fut त्वचिता । II Fut. त्वचिष्यति । Impera. त्वचतु । Imper. अत्वचत् । Poten. त्वचेत् । Bene. त्वच्यात् । Aor. अत्वाचीत् । or अत्वचीत् । Causa. त्वचयति । Aorist अतित्वचत् । Nouns :—त्वक् त्वचः वाक्त्वचम् ।

**ऋच १९ स्तुतौ ।**

आनर्च ।

19. √richa, to praise.

It is conjugated like √ऋष ।

Pre. ऋचति । Per. आनर्च । I Fut. अर्चिता । Nouns :—ऋक् ।

**उब्ज २० आर्जवे ।**

20. √ubja, to make straight.

The penultimate according to some, is not ब but an upadhmâniya letter, *viz.*, a sibilant of the guttural class, *i.e.* उ≍ज This upadhmâniya is included in the शर्, *i.e.* the sibilants श, ष; स include these lost sibilants of the guttural and palatal classes also. Thus the root being उ≍ज, the upadhmâniya is changed to a letter of the जश् class, *viz.*, ब. Thus we get उब्ज । Some read the root as having a penultimate द (da) which becomes ब. Whereas others read it as having ब as a penultimate originally. Thus according to these different views we have either अभ्युद्गः or अभ्युब्जः: similarly समुद्गः or समुब्जः ।

In the Desiderative, उबिब्जिषति ।

Pre. उब्जति । Per. उब्जां चकार । I Fut. उब्जिता । II Fut. उब्जिष्यति । Impera. उब्जतु । Imper. औब्जत् । Poten. उब्जेत् । Bene. उब्ज्यात् । Aor. औब्जीत् ।

Causa. उज्जयति । Aorist औज्जिजत् । (माभवानुज्जिजत्) । Desid. उज्जिजिषति (and not उबिब्जिषति) Ger. उज्जित्वा । Infin. उज्जितुम् । Adjec. उज्जितव्यं । Nouns :— न्युब्जः । ओजः ।

**उज्झ २१ उत्सर्गे ।**

21. √udjha, (ujjha) to abandon.

This root has a द as penultimate which is changed to ज ।

Pre. उज्झति । Nouns :—उद्ध्योनदः ।

**लुभ २२ विमोहने ।**

विमोहनमाकुलीकरणम् । लुभति । लोभिता–लोब्धा । लोभिष्यति ।

22. √lubha, to bewilder, confound, perplex.

The word विमोहन means to make one perplexed.

Pre. लुभति । Per. लुलोभ । I Fut. लोब्धा or लोभिता । II Fut. लोभिष्यति । Impera. लुभतु । Imper. अलुभत् । Poten. लुभेत् । Bene. लुभ्यात् Aor. अलोभीत् Causa. लोभयति । Aorist अलूलुभत् Desid. लुलुभिषति or लुलोभिषति । Inten. लोलुभ्यते । yañ luk लोलोब्धि । Ger. लोभित्वा लुभित्वा ।

**रिफ २३ कत्थनयुद्धनिन्दाहिंसादानेषु ।**

रिफति । रिरेफ । 'रिह' इत्येके । 'शिशुं न विप्रा मतिभी रिहन्ति' ।

23. √ripha, √riha, 1. to speak; to boast; to utter a rough grating sound; 2. to fight, 3. to revile, blame. 4. to hurt, kill. 5. to give.

It is conjugated like √lubha. Some read it as √riha as in the example शिशुं न विप्रामतिभीरिहन्ति । "The (innocent) child-like Brâhmaṇas injure others through their intelligence." The word न means इव or equal to.

Pre. रिफति । Per. रिरेफ ।

**तृप २४ तृम्फ २५ तृप्तौ ।**

आद्यः प्रथमान्तः । द्वितीयो द्वितीयान्तः । द्वावपि द्वितीयान्तावित्यन्ये । तृपति । ततर्प । तर्पिता । 'स्पृशमृश–' इति सिज्विकल्पः पौषादिकस्यैव अङपवादत्वात् । तेनात्र नित्यं सिच् । अतर्पीत् । तृम्फति । शस्य ङित्त्वात् 'अनिदिताम्–' (४१५) इति नलोपे । * शे तृम्फादीनां नुम्वाच्यः * । आदिशब्दः प्रकारे । तेन येऽत्र नकारानुषक्तास्ते तृम्फादयः । तृम्फन्ति । ततृम्फ । तृफ्यात् ।

24. √tṛip, √tṛipha, 25 √tṛinpha, to become satisfied.

The first ends with प and the second with फ. Some say that both end in फ. The optional सिच् ordained by the Vârtika स्पृशमृश given under S. 2407 in conjugating the √krisha of the Bhvâdi class. does not apply to this √tripa. For the √tripa mentioned in that Vârtika refers to pushâdi √tṛipa, because it declares a rule which sets aside the अङ् aorist of the pushâdi class (See III. 1. 55 S. 2343). Therefore in conjugating the √tṛipa of the Tudâdi class, the सिच् aorist is compulsory, as अतर्पीत् । The vikaraṇa श of the Tudâdi class being an अपित् sârvadhâtuka affix is ṅit under I. 2. 4 S. 2234. Consequently, the nasal of √तृम्फ requires elision by VI 4. 24 S. 415. But after such elision, the nasal is again inserted by the following Vârtika given under VII. 1. 59.

*Vart* :—The √तृम्फ and others like it, which have a nasal, should be also enumerated as taking the augment नुम् । These are the following roots of Tudâdi class: 24 तृप (तृफ), 25. तृम्फ तृप्तौ, 26. तुप तुम्प, 27 तुफ तुम्फ हिंसायाम् 28. दृफ (दृप), 29. दृम्फ उत्क्लेशे, 30 ऋफ (रिफ), ऋम्फ (रिम्फ), हिंसायाम 31 गुफ, गुम्फ ग्रन्थे, 32. उभ उम्भ पूरणे, 33. शुभ, शुम्भ शोभार्थे ॥ Of these, those which have a nasal, lose it by VI 4. 24, and then get the नुम् augment by the present rule, which being specifically ordained, cannot be again dropped. Thus तृम्फति, तुम्फति, तुम्पति, दृम्फति &c. Those which have no nasal, are conjugated as तृफति, तृफति, दृफति गुफति, उभति and शुभति ॥

The word आदि in the above *Vârtika* means प्रकार 'of the like nature' therefore, all roots of the Tudâdi class which have a nasal conjunct consonant are to be classed as तृम्फादि or तृम्फ like.

Pre. तृपति । Per. ततर्प । I Fut. तर्पिता । II Fut. तर्पिष्यति । Impera. तृपतु । Imper. अतृपत् । Poten. तृपेत् । Bene. तृप्यात् । Aor. अतर्पीत् । Causa. तर्पयति । Aorist अतीतृपत् or अततर्पत् । Desid. तितर्पिषति । Inten. तरीतृप्यते । yañ luk तर्तर्प्ति Ger. तर्पित्वा ।

25. √tṛimpha to become satisfied.

Pre. तृम्फति । Per. ततृम्फ । I Fut तृम्फिता । II. Fut. तृम्फिष्यति । Impera. तृम्फतु । Imper. अतृम्फत् । Poten. तृम्फेत । Bene. तृफ्यात् । Causa तृम्फयति । Aorist अततृम्फत् । Desid. तितृम्फिषति । Inten. तरीतृफ्यते । yañ luk तरीतृम्फति । Ger. तृम्फित्वा or तृफित्वा ।

## तुप २६ तुम्प २६ क । तुफ २७ तुम्फ २७ क । हिंसायाम् ।

तुपति । तुम्पति । तुफति । तुम्फति ।

26. √tupa, √tumpa, 27 √tupha, √tumpha, to injure, hurt. These roots are Bhuâdi also. See Nos. 431, 432, 435 and 436.

The difference is in accent.

Pre. तुपति ।

26A. √Tumpa to injure.

Pre. तुम्पति ।

27. √tupha to injure.

Pre. तुफति ।

27A. √tumpha to injure.

Pre. तुम्फति ।

## दृप २८ दृम्फ २९ उत्क्लेशे ।

प्रथमः प्रथमान्तः । द्वितीयो द्वितीयान्तः । प्रथमो द्वितीयान्त इत्येके । दृपति । दृफति । दृम्फति ।

28. √dṛipa, √dṛipha, 29 √dṛimpha to pain, torture.

Pre. दृफति । दृपति ।

29. √dṛimpha.

Pre. दृम्फति ।

**ऋफ ३० ऋम्फ ३० क । हिंसायाम् ।**

ऋफति । आनर्फ । ऋम्फति । ऋम्फांचकार ।

30. √ripha, √ripha, √rimpha to injure, hurt, kill.

Pre ऋफति । ऋम्फति । Per. आनर्फ । आनृफतुः । ऋम्फाञ्चकार । Desid. ऋफिफिषति । ऋम्फिफिषति । Ger अर्फित्वा । ऋम्फित्वा ।

**गुफ ३१ गुम्फ ३१ क । ग्रन्थे ।**

गुफति । जुगोफ । गुम्फति । जुगुम्फ ।

31. √gupha, √gumpha to weave together; tie, wind round.

Per. गुफति । गुम्फति : Per. जुगोफ । जुगुम्फ ।

**उभ ३२ उम्भ ३२ क । पूरणे ।**

उभति । उबोभ । उम्भति । उम्भांचकार ।

32. √ubha, √umbha, to fill with.

Pre. उभति । उम्भति । Per. उवोभ । ऊभतुः । उम्भाञ्चकार । Nouns :—उभौ । उभाहस्ति उभावाहस्ति । उभावाहु । उभयावाहु । कुम्भी।। अयस्कुम्भी कुम्भः कुम्भीनसः स्कुम्भः ।

**शुभ ३३ शुम्भ ३३ क । शोभार्थे ।**

शुभति । शुम्भति ।

33. √śubha, √śumbha to look beautiful, be splendid.

Pre. शुभति । शुम्भति ।

**दृभीँ ३४ ग्रन्थे ।**

दृभति ।

34. √dribhî to tie fasten, string together.

Pre. दृभति । Past Pass. दृब्धः ।

**चृती ३५ हिंसाग्रन्थनयोः ।**

चर्तिता । 'सेऽसिचि–' (२५०६) इति वेट् । चर्तिष्यति–चर्त्स्यति । अचर्तीत् ।

35. √chritî, 1. to hurt, kill, 2. to tie, bind or connect together.

Pre. चृतति । Per. चचर्त । चचृततुः । चचर्तिथ । I Fut. चर्तिता । II Fut. चर्तिष्यति or चर्त्स्यति । The इट् is optional by S. 2506, Impera. चृततु । Aor. अचर्तीत् । Causa. चर्तयति Aor. अची चृतत् । अचचर्तत् । Inten. चरीचृत्यते । yan luk चरीचर्ति । चरीचृतः । Past. चृतः । चृतवान् ।

**विध ३६ विधाने ।**

विधति । वेधिता ।

36. √vidha to rule, govern, administer.

Pre. विधति । Per. विवेध । I Fut. वेधिता । II Fut. वेधिष्यति । Impera. विधतु Imper. । अविधत् । Poten. विधेत् । Bene. विध्यात् । Aor. अवेधीत् । Causa. वेधयति Aor. अवीविधत् । Desid. विविधिषति । विवेधिषति । Inten. वेविध्यते । yan luk वेवेद्धि । Ger. विधित्वा । वेधित्वा ।

**जुड ३७ गतौ ।**

तवर्गपञ्चमान्त इत्येके । जुडति । 'मनतो जुनन्ति' ।

37. √juda (√juna); to go. Some read it as √जुन, as in the example, द्रुह्विर्यो विश्वे मरुतो जुनन्ति ।

Pre. जुडति । Per. जुजोड । I Fut. जोडिता । II Fut. जोडिष्यति । Impera. जुडतु । Imper. अजुडत् । Poten. जुडेत् । Bene. जुड्यात् । Aor. अजोडीत् । Condi. अजोडिष्यत् । Causa. जोडयति । Aor. अजूजुडत् । Desid. जुजुडिषति । जुजोडिषति । Inten. जोजुड्यते yan luk जोजुडीति । जोजोड्ढि । Past Pass. जुडितः । Ger. जुडित्वा । जोडित्वा ।

**मृड ३८ सुखने ।**

मृडति । मर्डिता ।

38. √mrida to be delighted or happy.

Pre. मृडति । Per. ममर्ड । I Fut. मर्डिता । II Fut. मर्डिष्यति । Impera. मृडतु । Imper. अमृडत् । Poten मृडेत् । Bene. मृड्यात् । Aor. अमर्डीत् । Condi. अमर्डिष्यत् । Desid. मिमर्डिषति । Inten. मरीमृड्यते yan luk मरीमर्ड्ढि । Nouns:—मृडानी मृडः मृडीकं ।

**पृड ३९ च ।**

पृडति ।

39. √prida cha, to delight, please.

Pre. पृडति । Per. पपर्ड । I Fut. पर्डिता II Fut. पर्डिष्यति । Impera. पृडतु । Imper. अपृडत् । Poten. पृडेत् । Bene. पृड्यात् । Aor. अपर्डीत् । Condi. अपर्डिष्यत् । Causa. पर्डयति । अपीपृडत् । अपपर्डत् । Desid. पिपर्डिषति । Inten. परी पृड्यते । परीपर्ड्ढि ।

**पृण ४० प्रीणने ।**

पृणति । पपर्ण ।

**वृण ४० क । च ।**

वृणति ।

40. √prina, √vrina to delight. The √वण is read after this.

Pre. पृणति । वृणति । Per. पपर्ण । I Fut. पर्णिता । II Fut. पर्णिष्यति । Impera. पृणतु । Imper. अपृणत् । Poten. पृणेत् । Bene. पृण्यात् । Aor. अपर्णीत् । Nouns :— लोकंपृणः ।

**मृण ४१ हिंसायाम् ।**

41. √mrina to injure, hurt, kill.

Pre. मृणति । Per. ममर्ण । I Fut मर्णिता । II Fut. मर्णिष्यति । Impera. मृणतु । Imper. अमृणत् । Poten मृणेत् । Bene. मृण्यात् । Aor. अमर्णीत् । Nouns: —मृणालम् ।

**तुण ४२ कौटिल्ये ।**

तुतोण ।

42. √tuna to curve, make crooked, bend.

Pre. तुणति । Per. तुतोण । I Fut. तोणिता । II Fut. तोणिष्यति । Impera. तुणतु । Imper. अतुणत् । Poten. तुणेत् । Bene. तुण्यात् । Aor. अतोणीत् ।

पुण ४३ कर्मणि शुभे ।

पुणति ।

43. √puṇa to be virtuous or holy, act in a virtuous manner.

Per. पुणति । Pre. पुपोण । I Fut. पोणिता । II Fut. पोणिष्यति । Impera. पुणतु । Imper. अपुणत् । Poten पुणेत् । Bene. पुण्यात् । Aor. अपोणीत् । Nouns :—अनैपुणम् । अनिपुणः । नैपुणी । आचार निपुणः । निपुणः ।

मुण ४४ प्रतिज्ञाने ।

44. √muṇa to promise.

Pre. मुणति । Per. मुमोण । I Fut. मोणिता । II Fut. मोणिष्यति । Impera. मुणतु । Imper. अमुणत् । Poten. मुणेत् । Bene. मुण्यात् । Aor. अमोणीत् ।

कुण ४५ शब्दोपकरणयोः ।

45. √kuṇa, 1. to sound, 2. to support aid.

Pre. कुणति । Per. चुकोण । I Fut. कोणिता । II Fut. कोणिष्यति । Impera कुणतु । Imper. अकुणत् । Poten. कुणेत् । Bene. कुण्यात् । Aor. अकोणीत् ।

शुन ४६ गतौ ।

46. √śuna, to go, move.

Pre. शुनति । Per. शुशोन । I Fut. शोनिता । II. शोनिष्यति । Impera. शुनतु । Imper. अशुनत् । Poten. शुनेत् । Bene. शुन्यात् । Aor. अशोनीत् । Nouns :—शुनकः ।

द्रुण ४७ हिंसागतिकौटिल्येषु ।

47. √druṇa 1. to hurt, injure, 2. to go, move, 3 to make curved or crooked, bend.

Pre. द्रुणति । Per. दुद्रोण । I Fut. द्रोणिता । II Fut. द्रोणिष्यति । Impera. द्रुणतु । Imper. अद्रुणत् । Poten. द्रुणेत् । Bene. द्रुण्यात् । Aor. अद्रोणीत् । Nouns :—द्रुणः । द्रोणी । द्रौणिकि । द्रुणी । द्रौणी । द्रौणायन । द्रौणकी । द्विद्रोणम् । द्रोणः ।

घुण ४८ घूर्ण ४९ भ्रमणे ।

48. √ghuṇa, 49 √ghûrṇa, to roll, whirl, stagger, reel.

Pre. घुणति । Per. जुघोण । I. Fut. घोणिता । II Fut. घोणिष्यति । Impera. घुणतु । Imper. अघुणत् । Poten. घुणेत् । Bene. घुण्यात् । Aor. अघोणीत् ।

Atm. Pre. घुणते । Per. जुघुणे । I Fut. घोणिता । II Fut. घोणिष्यते । Impera. घुणताम् । Imper. अघुणत । Poten. घुणेत् । Bene. घुणिषीष्ट । Aor. अघुणिष्ट ।

49. √ghûrṇa to roll, whirl.

Per. घूर्णति । Per. जुघूर्ण । I Fut. घूर्णिता । II घूर्णिष्यति । Impera. घूर्णतु । Imper. अघूर्णत् । Poten. घूर्णेत् । Bene. घूर्ण्यात् । Aor. अघूर्णीत् ।

Atm, Pre. घूर्णते । Per. जुघूर्णे । I Fut. घूर्णिता । II Fut. घूर्णिष्यते । Impera. घूर्णताम् । Imper. अघूर्णत । Poten. घूर्णेत ।.Bene. घूर्णिषीष्ट । Aor. अघूर्णिष्ट ।

षुर ५० ऐश्वर्यदीप्त्योः ।

सुरति । सुषोर । आशिषि सूर्यात् ।

50. √shura, √sura, 1. to rule; 2. shine.

Pre. घुरति । Per. घुघोर । घुघुरतुः । I Fut. घोरिता । II Fut. घोरिष्यति । Impera. घुरतु । Imper. अघुरत् । Poten. घुरेत् । Bene. घुर्यात् । Aor. अघोरीत् । Causa. घोरयति । अजूघुरत् । Inten. जोघूर्यते । yaṅ luk जोघोर्ति । Noun :—घुरः ।

## कुर ५१ शब्दे ।

कुरति । कूर्यात् । अत्र 'न भकुर्छुराम्' (१६२९) इति निषेधो न । करोतेरेव तत्र ग्रहणा-दित्याहुः ।

51. √kura to sound.

Pre. कुरति । Per. चुकोर । I Fut. कोरिता । II Fut. कोरिष्यति । Impera. कुरतु । Imper. अकुरत् । Poten. कुरेत् । Bene. कूर्यात् । The lengthening ordained by हलिच (VIII. 2. 77 S. 354) was set aside with regard tŏ कुर् by नभ कुर् &c. S. 1629. But that prohibition refers to कुर् form of √कृ 'to do' according to commentators. Hence there is lengthening with regard to this root. Aor. अकोरीत् ।

## खुर ५२ छेदने ।

52. √khura, √kshura to scratch, cut.

Pre. खुरति । Per- चुखोर । I Fut. खोरिता । II Fut. खोरिष्यति । Impera. खुरतु । Imper. अखुरत् । Poten. खुरेत् । Bene खुर्यात् । Aor. अखोरीत् । Inten. चोखुर्यते । Noun :—खुरः । क्षुरः । वाखुरा । खुरणाः ।

## मुर ५३ संवेष्टने ।

53. √mura to encircle, surround.

Pre. मुरति । Per. मुमोर । I Fut. मोरिता । II Fut. मोरिष्यति । Impera. मुरतु । Imper. अमुरत् । Poten. मुरेत् । Bene. मुर्यात् । Aor. अमोरीत् । Condi. अमोरिष्यत् । Noun :—मुरः ।

## क्षुर ५४ विलेखने ।

54. √kshura, √khura to make lines or furrows.

Pre. क्षुरति । Per. चुक्षोर । I Fut. क्षोरिता । II Fut. क्षोरिष्यति । Impera. क्षुरतु । Imper. अक्षुरत् । Poten. क्षुरेत् । Bene. क्षुर्यात् । Aor. अक्षोरीत् । Condi. अक्षोरिष्यत् । Noun :—क्षुरम् ।

## घुर ५५ भीमार्थशब्दयोः ।

55. √ghura, 1. to be frightful or terrible; 2 to sound, snore, snort to cry in distress.

Pre. घुरति । Per. जुघोर । I Fut. घोरिता । II Fut. घोरिष्यति । Impera. घुरतु । Imper. अघुरत् । Poten. घुरेत् । Bene. घुर्यात् । Aor. अघोरीत् । Nouns :— घोरः । घुघुरः ।

## पुर ५६ अग्रगमने ।

56. √pura to go in front.

Pre. पुरति । Per. पुपोर । I Fut. पोरिता । II Fut. पोरिष्यति । Impera पुरतु । Imper. अपुरत् । Poten. पुरेत् । Bene. पुर्यात् । Aor. अपोरीत् । Nouns:—पुरम् । पुरी ।

**वृहू ५७ उद्यमने ।**

**दन्त्योष्ठ्यादिः । पवर्गीयादिरित्यन्ये ।**

57. √vṛihû, √bṛihû, to grow, increase, expand. The root begins with the dento labial व v. Others say it is labial ब b.

Pre. वृहति । Per. ववर्ह । ववृहतु । ववर्हिथ । or ववढ । I Fut. वर्हिता । or वर्ढा । II Fut. वर्हिष्यति । or वर्क्ष्यति । Impera. वृहतु । Imper. अवृहत् । Poten. वृहेत् । Bene. वृह्यात् । Aor. अवर्हीत् or अवृक्षत् । अवर्हिषाम् or अवृक्षाताम् । Causa. वर्हयति । Aor. अववृहत् । अववर्हत् । Desid. विवर्हिषति । विवृक्षति । Inten. वरीवृह्यते । yañ luk वरीवर्ढि । Past Ger. वर्हित्वा or वृढ्वा ।

**तृहू ५८ स्तृहू ५८ क । तृंहू ५८ ख हिंसार्थाः ।**

**तृहति । ततर्ह । स्तृहति । तस्तर्ह । तर्हिता-तर्ढा । स्तर्हिता-स्तर्ढा । अतृंहीत्-अताङ्क्षीत् । अताण्ढाम् ।**

58. √tṛihû, (a) stṛihû, (b) tṛiṁhû to injure, hurt, kill. Pre. तृहति । Per. ततर्ह ।

58(a). √stṛihû Pre. स्तृहति । Per. तस्तर्ह । I Fut. स्तर्हिता or स्तर्ढा ।

58(b). तृंहू √tṛiṁhû to injure, kill.

Pre. तृहति । The nasal is elided by VI 4 24. S. 415, as the vikaraṇa श is ङित् (I. 2. 4.) Per. ततृंह । ततृंहतुः । ततृंहिथ । or ततृण्ढ । I Fut. तृण्ढा । or तृंहिता । II Fut. तृंहिष्यति । or तृङ्क्ष्यति । Impera. तृहतु । Imper. अतृहत् । Poten. तृहेत् । Bene. तृह्यात् । The yasuṭ being ङित् the nasal is elided. Aor. अतृंहीत् । अतृंहिष्टाम् or अताङ्क्षीत् । अताण्ढाम् । Causa. तृंहयति । Aor. अततृंहत् । Desid. तितृंहिषति । or तितृङ्क्षति । The anit, सन् is ङित् । Inten. तरीतृंहीति or तरीतृण्ढीति । Past तृढः । तृढवान् । Ger. तृंहित्वा or तृड्ढ्वा ।

**इष ५९ इच्छायाम् ।**

'इषुगमि-' (२४००) इति छः । इच्छति । एषिता-एष्टा । एषिष्यति । इष्यात् । ऐषीत् ।

59. √isha to wish for, desire. Some read it as having an indicatory उ । By S. 2400 the ष is replaced by छ in conjugational tenses.

Pre. इच्छति । Per. इयेष । ईषतुः । I Fut. एषिता । एष्टा । II Fut. एषिष्यति । Impera. इच्छतु । Imper. ऐच्छत् । Poten. इच्छेत् । Bene. इष्यात् । Aor. ऐषीत् । Nouns:—इष्टिः । इच्छा । इच्छुः । एषणी ।

**मिष ६० स्पर्धायाम् ।**

**मिषति । मेषिता ।**

60. √misha, to rival, contend, emulate.

Pre. मिषति । Per. मिमेष । I Fut. मेषिता । II Fut. मेषिष्यति । Impera. मिषतु । Imper. अमिषत् । Poten. मिषेत् । Bene. मिष्यात् । Aor. अमेषीत् अमेषिष्टाम् । Causa. मेषयति । Aor. अमीमिषत् । Desid. मिमिषिषति । मिमेषिषति । Inten. मेमिष्यते । yañ luk मेमेष्टि । Ger. मेषित्वा or मिषित्वा । Nouns:—मेषः । मेषी । निमेषः ।

**किल ६१ श्वैत्यक्रीडनयोः ।**

61. √kila, 1. to be or become white, 2. to play, sport.

Pre. किलति । Per. चिकेल । I Fut. केलिता । II Fut. केलिष्यति । Impera. किलतु । Imper. अकिलत् । Poten. किलेत् । Bene. किल्यात् । Aor. अकेलीत् । Causa. केलयति । Desid. चिकिलिषति । चिकेलिषति । Inten. चेकिल्यते । Noun:—किल्बिषम् ।

तिल ६२ स्नेहे ।

62. √tila, to be unctuous or greasy.

Pr. तिलति । Per. तितेल । I Fut. तेलिता । II Fut. तेलिष्यति । Impera. तिलतु । Imper. अतिलत् । Poten. तिलेत् । Bene. तिल्यात् । Aor. अतेलीत् । Causa. तेलयति । अतीतिलत् । Desid. तितिलिषति । तितेलिषति । Inten. तेतिल्यते ।

चिल ६३ वसने ।

63. √chila, to put on clothes.

Pre. चिलति । Per. चिचेल । I Fut. चेलिता । II Fut. चेलिष्यति । Impera. चिलतु । Imper. अचिलत् । Poten. चिलेत् । Bene. चिल्यात् । Aor. अचेलीत् । Causa. चेलयति । अचीचिलत् । Desid. चिचिलिषति । चिचेलिषति । Inten. चेचिल्यते ।

चल ६४ विलसने ।

64. √chala, to sport, play, frolic about

Pre. चलति । Per. चचाल । I Fut. चलिता । II Fut. चलिष्यति । Impera. चलतु । Imper. अचलत् । Poten. चलेत् । Bene. चल्यात् । Aor. अचालीत् । अचलीत् । Causa. चलयति । Desid. चिचलिषति । Inten. चाचल्यते ।

इल ६५ स्वप्नक्षेपणयोः ।

65. √ila, 1. to sleep, 2 to throw.

Pre. इलति । Per. इयेल ईलतुः । I Fut. एलिता । II Fut. एलिष्यति । Impera. इलतु । Imper. ऐलत् । Poten. इलेत् । Bene. इल्यात् । Aor. ऐलीत् । ऐलिष्टाम् । Condi. ऐलिष्यत् । Causa. एलयति । Desid. एलिलिषति । Noun :— इला 'earth'.

विल ६६ संवरणे ।

दन्त्योष्ठ्यादिः ।

66. √vila, to cover conceal. It begins with the dento-labial व v.

Pre. विलति । Per. विवेल । I Fut. वेलिता । II Fut. वेलिष्यति । Impera. विलतु । Imper. अविलत् । Poten. विलेत् । Bene. विल्यात् । Aor. अवेलीत् ।

बिल ६७ भेदने ।

ओष्ठ्यादिः ।

67. √bila, to split, cleave, divide. It begins with the labial ब b.

Pre. बिलति । Per. बिबेल । I Fut. बेलिता । II Fut. बेलिष्यति । Impera. बिलतु । Imper. अबिलत् । Poten. बिलेत् । Bene. बिल्यात् । Aor. अबेलीत् । Noun :— बिलम् ।

णिल ६८ गहने ।

68. √nila, to become grave, hard, to lurk, hide, to stick, to die.

Pre. निलति । प्रणिलति । Per. निनेल । I Fut. नेलिता । II Fut. नेलिष्यति । Impera. निलतु । Imper. अनिलत् । Poten. निलेत् । Bene. निल्यात् । Aor. अनेलीत् ।

हिल ६९ भावकरणे ।

69. √hila, to sport amorously.

Pre. हिलति । Per. जिहेल । I Fut. हेलिता । II Fut. हेलिष्यति । Impera. हिलतु । Imper. अहिलत् । Poten. हिलेत् । Bene. हिल्यात् । Aor. अहेलीत् ।

**शिल ७० षिल ७० उञ्छे ।**

70. √sila, √shila to glean.

Pre. शिलति । षिलति । Per. शिशेल । षिषेल । I Fut. शेलिता । षेलिता ।

**मिल ७१ श्लेषणे ।**

71. √mila to join. The svaritet √mila is given further on The present √mila will be Parasmaipadi even when the fruit of the action accrues to the agent.

Pre. मिलति । Per. मिमेल । I Fut. मेलिता । II Fut. मेलिष्यति । Impera. मिलतु । Imper. अमिलत् । Poten. मिलेत् । Bene. मिल्यात् । Aor. अमेलीत् ।

**लिख ७२ अक्षरविन्यासे ।**

लिलेख ।

72. √likha to write.

Pre. लिखति । Per. लिलेख । I Fut. लेखिता । II Fut. लेखिष्यति । Impera. लिखतु । Imper. अलिखत् । Poten. लिखेत् । Bene. लिख्यात् । Aor. अलेखीत् । Desid. लिलिखिषति । लिलेखिषति । Inten लेलिख्यते । Past Pass. लिखितः । Act. लिखितवान् । Ger. लिखित्वा । लेखित्वा । Nouns :—लेखनः । लेखनी रेखा । लेखा । दुर्लेखः । दन्तलेखकः ।

**कुट ७३ कौटिल्ये ।**

'गाङ्कुटादिभ्यः–' (२४६१) इति ङित्वम् । चुकुटिथ । चुकोट । चुकुट । कुटिता ।

73. √kuṭa, to be crooked or curved. From this up to 108 √kuñ are the kuṭâdi roots. All affixes after these roots are considered as ṅit except those which have an indicatory ञ or ण (See I. 2. 1 S. 2461).

Pre कुटति । Per. चुकोट । चुकुटतुः । चुकुटिथ । चुकोट or चुकुट । चुकुटिव । 1 Fut. कुटिता । II Fut. कुटिष्यति । Impera. कुटतु । Imper. अकुटत् । Poten. कुटेत् । Bene. कुट्यात् । Aor. अकुटीत् । अकुटिष्टाम् । Causa. कोटयति । Aor. अचूकुटत् । Desid. चुकुटिषति । Inten. चोकुटयते । yan luk चोकुटीति । चोकोट्टि । The affixes are ṅit in the yan luk. Ger. कुटित्वा । Nouns :—कुटयः । कोटयः । कोटः । कुट्टकः । कुड्मलम् । कोटरः कुटिलम् । कुटिलिका । कौटिलिकः । कुटी । कुटीरः । कुटरः ।

**पुट ७४ संश्लेषणे ।**

74. √puṭa to embrace, clasp, intertwine.

Pre. पुटति । Per. पुपोट । I Fut. पुटिता । Aor. अपुटीत । Nouns :—पुटिका । पुटः ।

**कुच ७५ संकोचने ।**

75. √kucha, to contract. The word संकोचन given as the meaning of this root is formed by the affix ल्युट् added to कुच् । The form ought to be संकुचन, but the use of संकोचन by Pâṇini shows that ल्युट् causes guṇa inspite of the root belonging to the kuṭadi class.

Pre. कुचति । Per. चुकोच । I Fut. कुचिता । Aor. अकुचीत् । Nouns :—संकोचः

**गुज ७६ शब्दे ।**

76. √guj, to sound to hum, buzz.

Pre. गुजति । Per. जुगोज । I Fut. गुजिता Aor. अगुजीत् । Noun :—गोजः ।

गुड ७७ रक्षायाम् ।

77. √guḍa, to defend, preserve.

Pre. गुडति । Per. जुगोड । I Fut. गुडिता । Aor. अगुडीत । Nouns :—गुडः 'Sugar,' गुडा 'hair'.

डिप ७८ क्षेपे ।

78. √ḍipa, to throw, cast, send. This root is found in the Divâdi class also, as डिप्यति ।

Pre. डिपति । Per. डिडेप । I Fut. डिपिता । Aor. अडिपीत् ।

छुर ७९ छेदने ।

'न भकुर्छुराम्' (१६२९) इति न दीर्घः । छुर्यात् ।

79. √chhura, to cut, divide. The उ is not lengthened in the Benedictive, because of the prohibition of VII. 2. 79 S. 1629.

Pre. छुरति । Per. चुच्छोर । I Fut. छुरिता । Bene. छुर्यात् । छुर्यास्ताम् । Aor. अछुरीत । Noun :—छुरिका ।

स्फुट ८० विकसने ।

स्फुटति । पुस्फोट ।

80. √sphuṭa, to expand, open, blow, blossom.

It is conjugated in the Bhuadi and Churadi classes also.

Pre. स्फुटति । Per. पुस्फोट । I Fut. स्फुटिता । Aor. अस्फुटीत् ।

मुट ८१ आक्षेपमर्दनयोः ।

81. √muṭa 1. to blame, rebuke, 2 to crush.

It is conjugated in the Bhuadi also as मोटति ।

Pre. मुटति । Per. मुमोट । I Fut. मुटिता । Aor. अमुटीत ।

त्रुट ८२ छेदने ।

'वा भ्राश-' (२३२१) इति श्यन्वा । त्रुट्यति-त्रुटति । तुत्रोट । त्रुटिता ।

82. √truṭa, to tear, break, snap.

Pre. त्रुटति । or त्रुट्यति । This root optionally takes श्यन् by III. 1. 70 S. 2321. Per. तुत्रोट । I Fut. त्रुटिता । Impera. त्रुटतु or त्रुट्यतु । Imper. अत्रुटत् or अत्रुट्यत् । Poten. त्रुटेत् or त्रुट्येत । Aor. अत्रुटीत् । Noun :—त्रोटिः ।

तुट ८३ कलहकर्मणि ।

तुटति । तुतोट । तुटिता ।

83. √tuṭa, to dispute, quarrel.

Pre. तुटति । Per. तुतोट । I Fut. तुटिता । Aor. अतुटीत् । Noun :—तुटिः ।

चुट ८४ छुट ८४ क । छेदने ।

84. √chuṭa, √chhuṭa, √chuṇa to cut off, divide.

The Bhvâdi form is चोटति ।

Pre. चुटति । छुटति । Per. चुचोट । चुच्छोट । I Fut. चुटिता । छुटिता । Aor. अचुटीत् । अछुटीत् ।

**जुट ८५ बन्धने ।**

85. √juḍa, √juṭa, to bind.

Pre. जुटति । जुडति । Per. जुजोट । जुजोड । 1 Fut. जुटिता । जुडिता । Aor. अजुटीत् । अजुडीत् ।

**कड ८६ मदे ।**

86 √kaḍa, to be disturbed or confused. This root need not have been read in the kuṭadi list, as it does not show any peculiarity of ṅit conjugation.

Pre. कडति । Per. चकाड । I Fut कडिता । Aor. अकडीत् ।

**लुट ८७ संश्लेषणे ।**

87. √luṭa, to adhere.

It is conjugated in the Bhvâdi and Divâdi classes, also, as लोटति and लुटयति ।

Pre. लुटति । Per. लुलोट । I Fut. लुटिता ।

**कृड ८८ घनत्वे ।**

घनत्वं सान्द्रता । चकर्ड । कृडिता ।

88 √kriḍa, to cluster together. The word, घनत्व means सान्द्रता 'clustered together', 'dense'. According to some it means 'to graze'.

Pre कृडति । Per. चकर्ड । I Fut. कृडिता ।

**कुड ८९ बाल्ये ।**

89. √kuḍa, to play or act like a child.

Pre. कुडति । Per. चुकोड । I Fut. कुडिता ।

**पुड ९० उत्सर्गे ।**

90. √Puḍa, to leave, quit, abandon.

Atreya reads मुड instead.

Pre. पुडति ।

**घुट ९१ प्रतिघाते ।**

91. √ghuṭa, to retaliate, to strike again. It is conjugated in the Atmanepadi of the Bhvadi class also. (I. 782).

Pre. घुटति । Per. जुघोट । I Fut. घुटिता । Nouns :—घोटः । घोटकः ।

**तुड ९२ तोडने ।**

तोडनं भेदः ।

92. √tuḍa, to split, rend, break. The word तोडन means breaking. This root ends in the third letter *i.e.*, ड; but that which ends in the first letter *i.e.*, ट (तुट) meaning (to dispute, quarrel, has already been conjugated before (See No. 83).

Pre. तुडति । (The Bhvadi form is तोडति ।) Per. तुतोड । I Fut. तुडिता ।

थुड ९३ स्थुड ९४ संवरणे ।

थुडति । तुथोड । तुथुड । 'खुड' 'छुड' इत्येके ।

93. √thuḍa, 94 √sthuḍa, to cover, screen. Some read खुड and छुड instead.

Pre. थुडति । Per. तुथोड । I Fut. थुडिता ।

94. √sthuḍa to cover, screen.

Pre. क्लिश्नाति । क्लिश्नीतः । क्लिश्नासि । क्लिश्नामि । Per. चिक्लेश । चिक्लिशतुः चिक्लिशिथ or चिक्लेष्ठ । चिक्लिशिव or चिक्लिश्व । I Fut. क्लेष्टा or क्लेशिता । II Fu क्लेशिष्यति or क्लेक्ष्यति । Impera. क्लिश्नातु । क्लिशान । क्लिश्नानि । Imper. अक्लिश्नात् Poten. क्लिश्नीयात् । Bene. क्लिश्यात् । Aor अक्लेशीत् or अक्लिक्षत् । अक्लेशिष्टाम् Causa. क्लेशयति Aor. । अचिक्लिशत् । Desid चिक्लेशिषति, चिक्लिशिषति or चिक्लिक्षति Inten. चेक्लिश्यते । Past Parti. Pass. क्लिष्टः or क्लिशितः Ger । क्लिशित्वा or क्लिष्ट्वा

## अश ५१ भोजने ।

अश्नाति । आश ।

51. √aśa to eat.

Pre. अश्नाति । अश्नीतः । अश्नासि । अश्नामि । Per. आश । आशिथ । आशिव I Fut. अशिता । II Fut. अशिष्यति । Impera. अश्नातु । अशान । अश्नानि । Imper आश्नात् । आश्नाः । आश्नाम् । Poten. अश्नीयात् । Bene. अश्यात् । Aor. आशीत् । आशिष्टाम् । Causa. आशयति । Aor. आशिशत् । Desid. अशिशिषति । Inten. अशाश्यते । yaṅ luk आशष्टि । See vârtika under S. 2630. Per Parti Parasmai आश्वान् । (III. 2. 109. S. 3098).

## उध्रस ५२ उञ्छे ।

उकार इत् । ध्रस्नाति । उकारो धात्ववयव इत्येके । उध्रसांचकार ।

52. √udhrasa to throw or toss up. 2. to glean. The उ is indicatory. Kshîraswâmi says the उ is part of the root. Then the Perfect is उध्रसांचकार । Pre. उध्रस्नाति । Aor औध्रसात् ।

Pre. ध्रस्नाति । Per. दध्रास । दध्रसिथ । I Fut ध्रसिता । II Fut. ध्रसिष्यति । Impera. ध्रस्नातु । ध्रसान । Imper. अध्रस्नात् । Poten. ध्रस्नीयात् । Bene. ध्रस्यात् । Aor. अध्रासीत् । or अध्रसीत् । Causa. ध्रासयति । Aor अदिध्रसत् । Desid. दिध्रसिषति । Inten दाध्रस्यते yaṅ luk दाध्रस्ति । Past Parti. Pass. ध्रस्तं । Ger. ध्रसित्वा । or ध्रस्त्वा ।

## इष ५३ आभीक्ष्ण्ये ।

पौनः पुन्यं भृशार्थो वा आभीक्ष्ण्यम् । इष्णाति । 'तीषसह-' (२३४०) इत्यत्र सहिना साहचर्याद्विकरणस्य तौदादिकस्यैव इषेर्ग्रहणं न तु इष्यतीष्णात्योरित्याहुः । एषिता । वस्तुतस्तु इष्णातेरपि इड्विकल्पो उचितः । तथा च वार्तिकम्— '* इषेस्तकारे श्यन्प्रत्ययात्प्रतिषेधः *' इति ।

53. √isha to cause to move quickly, let fly, cast. 2. to fly off, escape, 3. to strike, smite.

The word âbhîkshṇyam means continued repetition or intensity. See III. 2. 81. The continuity refers to the action in general. The √isha mentioned in VII. 2. 48 S. 2340 does not refer to the present root, because that root is recited there along with सह and therefore refers to the Tudâdi root इष whose vikaraṇa is श and not to this root or to the √isha of the Divadi class. This is what the Achâryas say. Therefore the इट् augment is not optional in the case of the present root. Thus the 1st Future is एषिता according to their opinion. But as a matter of fact, the present root also takes optionally इट् because of the following.

*Vârtika.* The इट् is prohibited in the 3rd Singular after the √isha of the Divâdi class only (See Padamanjari on VII. 2. 48).

Pre. इष्णाति । इष्णीतः । Per. इयेष । ईषतुः । ईषुः । इयेषिथ । इयेष । ईषिव । I Fut एषिता or एष्टा । II Fut. एषिष्यति । Impera. इष्णातु । इषाण । इष्णानि । Imper. ऐष्णात् । ऐष्णीताम् । ऐष्णः । Poten. इष्णीयात् । Bene. इष्यात् । Aor. ऐषीत् । Condi. ऐषिष्यत् । Causa. एषयति । Aor. मा भवानैषिषत् । Desid. एषिषिषति । Past Parti. Pass. इषितः । Ger. एषित्वा ।

**विष ५४ विप्रयोगे ।**

विष्णाति । वेष्टा ।

54. √visha to separate, to disjoin.

Pre विष्णाति । Per. विवेश । विवेषिथ । विविषिव । I Fut. वेष्टा । Impera. विष्णातु । विषाण । विष्णानि । Imper. अविष्णात् ।

**प्रुष ५५ प्लुष ५६ स्नेहनसेचनपूरणेषु ।**

प्रुष्णाति । प्लुष्णाति ।

55. √prusha, 56 √plusha, 1. to become wet or moist, 2. to pour out, sprinkle, 3. to fill.

Pre. प्रुष्णाति । Per. पुप्रोष । पुप्रोषिथ । पुप्रुषिव । II Fut. प्रोषिष्यति । Impera. प्रुष्णातु । प्रुषाण । प्रुष्णानि । Imper. अप्रुष्णात् । Poten. प्रुष्णीयात् । Bene. प्रुष्यात् । Aor. अप्रोषीत् । Causa. प्रोषयति । Aor. अपुप्रुषत् । Desid. पुप्रु (or प्रो) षिषति । Inten. पोप्रुष्यते yañ luk पोप्रोष्टि । Past Parti Pass. प्रुषितः । Ger. प्रोषित्वा or प्रुषित्वा ।

56. √plusha. It is conjugated like the last.

Pre. प्लुष्णाति ।

**पुष ५७ पुष्टौ ।**

पोषिता ।

57. √pusha, to nourish, to support.

Pre. पुष्णाति । पुष्णीतः । Per पुपोष । पुपोषिथ । I Fut पोषिता । Impera. पुषाण । Imper. अपुष्णात् । Poten. पुष्णीयात् ।

**मुष ५८ स्तेये ।**

मोषिता ।

58. √musha to steal.

Pre. मुष्णाति । I Fut. मोषिता । Desid. मुमुषिषति । Ger. मुषित्वा ।

**खच ५९ भूतप्रादुर्भावे ।**

भूतप्रादुर्भावोऽतिक्रान्तोत्पत्तिः । खच्ञाति । वान्तोऽयमित्येके ।

59. √khacha, to come forth, appear, to be born again.

Some say the root is खव ।

Pre. खच्ञाति । Per. चखाच । चखचिथ । चखचिव । I Fut. खचिता । II Fut. खचिष्यति । Impera. खच्ञातु । चखान । खच्ञानि । Imper. अखच्ञात् । Poten. खच्ञीयात् । Bene. खच्यात् । Aor. अखचीत् or अखाचीत् । Causa. खाचयति । Aor. अचीखचत् । Desid. चिखचिषति । Inten. चाखच्यते । yañ luk चाखक्ति । Past Parti. Pass. खचितः । Ger. खचित्वा ।

59*a*. √khava.

Before कित् and ङित् affixes the व is changed to ऊ by the following sûtra.

२५६१ । च्छ्वोः शूडनुनासिके च । ६ । ४ । १९ ।

सतुक्कस्य छस्य वस्य च क्रमात् 'श' 'ऊठ्' इत्यादेशौ स्तोऽनुनासिके क्वौ झलादौ च क्ङिति । खौनाति । चखाव । खविता । शानचः परत्वादूठि कृते हलन्तत्वाभावान्न शानच् । खौनीहि ।

2561. For च्छ् (including the augment तुक्) is substituted श्, and for व is substituted ऊठ्, before an affix beginning with a Nasal, as well as before क्वि and jhalâdi कित् and ङित् affixes (VI. 4. 15).

Thus खव्+ना+ति=ख+ऊठ्+ना+ति=खौनाति । Pre. खौनाति । Per. चखाव । I Fut. खविता । Impera. खौनातु । खौनीहि । The affix शानच् required by III. 1. 83 S. 2557 is not added here because when ऊठ् substitution takes place, the root no longer ends in a consonant Imper. अखौनात् । Poten. खौनीयात् । Bene. खव्यात् ।

हेठ ६० च ।

भूत्वत् । हेठ्नाति ।

60. √hedha cha, to be born, &c.

Pre. हेठ्णाति। The ठ is changed to ठ् and न to ण.

ग्रह ६१ उपादाने ।

स्वरितेत् । 'ग्रहिज्या-' (२४१२) । गृह्णाति-गृह्णीते ।

61. √graha, to seize. This root is svaritet. The र is vocal'sed into ऋ by S. 2412. Thus we have P. गृह्णाति । A. गृह्णीते । The augment इट् is lengthened by the following sûtra.

२५६२ । ग्रहोऽलिटि दीर्घः । ७ । २ । ३७ ।

एकाचो ग्रहेर्विहितस्येटो दीर्घः स्यान्न तु लिटि । ग्रहीता । लिटि तु जग्रहिथ । गृह्यात् । ग्रहीषीष्ट । 'ह्यन्त-' (२२९९) इति न वृद्धिः । अग्रहीष्टाम् । अग्रहीष्ट । अग्रहीषाताम् । अग्रहीषत ।

2562. The augment इट added to the valâdi ârdhadhâtuka affixes, becomes lengthened, except in the Personal endings of the Perfect, after the root ग्रह ॥

As ग्रहीता, ग्रहीतुम्, ग्रहीतव्यम् ॥ Why not in the Perfect? Observe जगृहिव जगृहिम् ॥ The lengthening takes place of the इट् taught in VII. 2. 35, and does not refer to the चिण्वद् इट् of VI. 4. 62; as ग्राहिता, ग्राहिष्यते ॥

61. √graha, to seize, take:

Parasmai. Per. गृह्णाति । गृह्णीतः । गृह्णाति । गृह्णामि । Pre. जग्राह । जगृहतुः । जगृहुः । जग्रहिथ । जगृहथुः । जग्राह or जग्रह । जग्रहिव । I Fut. ग्रहीता (S. 2562) II Fut. ग्रहीष्यति (S. 2562) Impera. गृह्णातु । गृहाण । गृह्णानि । Imper. अगृह्णात् । अगृह्णीताम् । Poten. गृह्णीयात् । गृह्णीयाताम् । गृह्णीयाः । Bene. गृह्यात् । गृह्यास्ताम् । Aor. अग्रहीत् । अग्रहीष्टाम् । The vṛidhi is prohibited because the root ends in ह.

See S. 2299. Desid. जिघृक्षति । Inten. जरीगृह्यते । yañ luk जाग्राढि । D. जागृढः । Another form is जाग्रहीति । 2nd S. जाग्रक्षि । 1st जाग्रह्मि । D. जागृह्वः । Nouns :— प्रगृह्यम् । गृह्यकाः । गृह्यः । ग्राहः । ग्रहः । गृहं ।

Atm. Pre. गृह्णीते ।।गृह्णीषे । गृह्णे । गृह्णीवहे । Per. जगृहे । जगृहाते । जगृहिषे । जगृहिढ्वे or ध्वे जगृहिवहे । II Fut. ग्रहीष्यते । Impera. गृह्णीताम् । गृह्णाताम् । गृह्णीष्व । गृह्णै । Imper. अगृह्णीत । अगृह्णाताम् । Poten. गृह्णीत । गृह्णीयाताम् गृह्णीरन् । Bene. ग्रहीषीष्ट । ग्रहीषीयास्ताम् । Aor. अग्रहीष्ट । अग्रहीषाताम् । अग्रहीषत । Desid. जिघृक्षते ।

61. √graha, yañ luk.

Pre. जाग्रहीति or जाग्राढि । जागृढः । जाग्रक्षि । जाग्रह्मि । जागृह्वः । Per. जाग्रहाञ्चकार । I Fut. जाग्रहीता । II Fut. जाग्रहीष्यति । Impera. जाग्राढु । जागृढाम् । जागृढि । Imper अजाग्रट् । अजागृढाम् । अजागृहुः । अजाग्रट् । अजाग्रहम् । Poten. जागृह्यात् । जागृह्यातां । Bene. जागृह्यात् । जागृह्यास्तां । Aor. अजाग्रहीत् । Condi. अजाग्रहीष्यत् ।

*Here end the Kryâdi roots.*

इति तिङन्तक्र्यादिप्रकरणम् ।

अथ तिङन्त चुरादि प्रकरणम् ।

# CHAPTER X.

## THE CHURADI ROOTS.

चुर १ स्तेये ॥

This class contains roots which are conjugated almost like causatives. The affix णिच् must be added, by the following sûtra, in order to *complete* the root.

२५६३ । सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच् । ३ । १ । २५ ।

एभ्यो णिच्स्यात् । चूर्णान्तेभ्यः 'प्रातिपदिकाद्धात्वर्थे–' इत्येव सिद्धं तेषामिह ग्रहणं प्रपञ्चार्थम् । चुरादिभ्यस्तु स्वार्थे । 'पुगन्त–' (२१८९) इति गुणः । 'सनाद्यन्ताः–' (२३०४) इति धातुत्वम् । तिप्शबादि गुणायादेशौ । चोरयति ।

2563. The affix णिच् is employed after these words, *viz.* :— सत्य 'truth' (which then takes the form of सत्याप as exhibited in the sûtra), पाश 'a fetter', रूप 'form', वीणा 'a lute', तूल 'cotton', श्लोक 'celebration', सेना 'an army', लोम 'the hair of the body', त्वच 'the skin', वर्म 'mail', वर्ण 'celebration', चूर्ण 'powder' and the verb of the Churâdi class.

Thus सत्यापयति 'he speaks truly'; विपाशयति 'he unfetters or liberates; रूपयति 'he looks'; उपवीणयति 'he sings with the lute'; अनुतूलयति 'he makes a brush'; उपश्लोकयति 'he praises in verse'; अभिषेणयति 'he advances with the army', अनुलोमयति 'he rubs over the hair', त्वचयति 'he feels of the skin'; संवर्मयति। 'he puts on the mail armour'; वर्णयति '*he* celebrates or colors'; अवचूर्णयति he pulverises. The roots of the *Churâdi* class belong to the tenth conjugation, a list of which will be given hereafter. After the verbs of the *Churâdi* class, the affix णिच् is employed without alteration of the sense; as चोरयति। 'he steals'. So also चिन्तयति।

From सत्य upto चूर्ण are enumerated certain prâtipadikas that take णिच्। It was not necessary to have mentioned them separately. For they would, like every other noun, have taken णिच् to form verbs, under the General Rule given further on: namely the——

*Gana-Sutra*:—Diversely the affix णिच् is added to a pratipadika, with the force of the meaning of the root, and thereby the word undergoes the same modifications as before इष्ठन्।

This gaṇa sûtra is taught further on; See root No. 368. The mention of these special nouns in this sûtra is therefore illustrative only. While in the case of the Churâdi roots, the force of the affix is that of svârtha—*i.e.*, it does not change the meaning of the root.

Thus चुर्+णिच्=चोर्+णिच् (The guṇa is by S. 2189)=चोरि। Now the stem चोरि gets the designation of dhâtu or root by S 2304. Being a dhâtu, it takes शप् vikaraṇa, the vikaraṇa of the roots in general, and the terminations तिप् &c. Thus चोरि+शप्+तिप् (III. 1. 68. S. 2167)=चोरे+अ+ति (VII. 3. 84 S. 2168)=चोरयति।

The root चोरि like all other roots of this class may be conjugated in the Atmanepada also, when the fruit of the action accrues to the agent. The following sûtra states that rule.

२५६४। णिचश्च। १। ३। ७४।

णिजन्तादात्मनेपदं स्यात्कर्तृगामिनि क्रियाफले। चोरयते। चोरयामास। चोरयिता। चोर्यात्। चोरयिषीष्ट। 'णिश्रि-' (२३१२) इति चङ्। 'णौ चङि-' (२३१४) इति ह्रस्वः। द्वित्वम्। 'हलादिः शेषः' (२१७९)। 'दीर्घो लघोः' २३१८ इत्यभ्यासदीर्घः। अचूचुरत्-अचूचुरत।

2564, After a verb ending in affix ṇi (णिच्) when the fruit of the action accrues to the agent, the Atmanepada is employed.

Thus चोरयते. The Perfect is formed periphrastically, as चोरयामास। The First Future is चोरयिता। The Paras. Ben. is चोर्यात्। The Atm. Benedictive is चोरयिषीष्ट।

The aorist of णिजन्त roots is formed by चङ् under III. 1. 48. S. 2312. Thus चोरि+चङ्+त=चोर्+चङ्+त (VI. 4. 51. S. 2313)=चुर्+चङ्+त (the shortening takes place by VII 4. 1. S. 2314)=चुर्+चुर्+चङ्+त (VI. 1. 11.

S. 2315) = चु + चुर् + चङ् + त (VII. 4. 60. S 2179) = च + चुर् + चङ् + त (VII. 4. 94. S. 2318) = अचूचुरत । The Atmanepada Aorist will be अचूचुरत ।

चुर १ स्तेये ।

1. √chura, to steal. The final अ in चुर is for the sake of utterance only: as there is no other necessity of it. The root चुर् &c. are incoate roots: to complete them, णिच् is added. The real root is चोरि । Sometimes, however, चुर &c. are considered as independent roots.

Parasmai. Pre. चोरयति । चोरयतः । चोरयन्ति । चोरयसि । चोरयथः । चोरयथ । चोरयामि । चोरयावः । चोरयामः । Per. चोरयां चकार or चोरयां बभूव or चोरयामास । I Fut. चोरयिता । II Fut. चोरयिष्यति । Impera. चोरयतु । Imper. अचोरयत् । Poten. चोरयेत् । Bene. चोर्यात् । Aor. अचूचुरत् । Desid. चुचोरयिषति । Nouns :—चोरः । चौरः । चोरणा ।

Atmane. Pre. चोरयते । चोरयेते । चोरयन्ते । चोरयसे । चोरयेथे । चोरयध्वे । चोरये । चोरयावहे । चोरयामहे । Per. चोरयां चक्रे । I Fut. चोरयिता । II. Fut. चोरयिष्यते । Impera. चोरयताम् । Imper. अचोरयत । Poten. चोरयेत । Bene. चोरयिषीष्ट । Aor. अचूचुरत । Desid. चुचोरयिषते ।

चिति २ स्मृत्याम् ।

चिन्तयति । अचिचिन्तत् । 'चिन्त' इति पठितव्ये इदित्करणं णिचः पाक्षिकत्वे लिङ्गम् । तेन 'चिन्त्यात्' 'चिन्त्यते' इत्यादौ नलोपो न । चिन्तति । चिन्तेत् । एतच्च ज्ञापकं सामान्या-पेक्षमित्येके । 'अत एकहल्–' (२२६०) इत्यत्र वृत्तिकृता 'जगाण' 'जगणतुः' इत्युदाहृतत्वात् । विशेषापेक्षमित्यपरे । अत एव 'आधृषाद्वा' इत्यस्य न वैयर्थ्यम् ।

2. √chiti, to think, consider, ponder over. For the purposes of Churâdi, the root ought to have been read as चिन्त and not चिति with an indicatory इ । The nasal brought in by इदित् differs from the nasal uttered with the root, in one important point, namely the इदित् nasal is never elided, the other is elided before क्ङित् affixes (VI. 4 24. S. 415). But that contingency can never apply to the Churâdi roots For these roots invariably take णिच्, and so half roots like चिन्त &c. can never be followed *directly* by a क्ङित् affix, for णिच् always intervenes. Even when णिच् is elided under certain circumstances, the lopa becomes sthânivat and acts as a buffer. What is then the necessity of this indicatory इ in चिति and why is not the semi-root read चिन्त at once ?

The very fact of this इदित् shows, by implication, the existence of the following rule: "all the so called Churâdi roots, that have an indicatory इ get णिच् *optionally*." Therefore these roots may be conjugated like Bhvâdi roots also. And when thus conjugated the इदित् prevents the elision of the nasal. As चिन्त्यात्, चिन्त्यते &c. Others hold that the इ is an indication that *all* Churâdi roots are optionally णिजन्त; and not merely those roots which have an indicatory इ । The author of the Kâsikâ evidently adopts this view. For in giving counter-examples of rule VI. 4. 120 S. 2260, he writes जगणतुः, जगणुः from the Churâdi root गण । If the णिच् were universal,

गच would have formed its Perfect periphrastically and never by reduplication. While on the other hand, some hold, that the इ in णिच् does not indicate that *all* Churâdi roots are optionally णिजन्त, but that it indicates only a special rule, namely those Churâdi roots which are marked with इ may take णिच् optionally. Their authority is the gaṇa sûtra आधृषाद्वा, which is read after the root स्वद् (No. 263) It means that all roots from No. 264 upto 306 (गच) take णिच् optionally. If the णिच् was optional for *all* the roots of the Churâdi class, there was no necessity of specialising these few roots from युज upto धृष। In this view, this gaṇa sûtra does not become superfluous, as it would be under the former view.

Pre. चिन्तयति। चिन्तति। Per चिन्तयामास or चिचिन्त। I Fut. चिन्तयिता or चिन्तिता। Poten. चिन्तयेत्। चिन्तेत्। Bene चिन्त्यात्। Aor. अचिचिन्तत्। Nouns:— चिन्ता।

## यत्रि ३ संकोचे।

यन्त्रयति। 'यन्त्र' इति पठितुं शक्यम्। यत्तु इदित्करणादन्त्रतीति माधवेनोक्तं तच्चिन्त्यम्। एवं कुद्रितन्त्रिम न्त्रिषु।

3 √yatri, to restrain, curb, check The root might well have been read as यन्त्र। Mâdhava on the strength of its being इदित्, makes णिच् optional, and he conjugates it in the Bhuâdi also. As यन्त्रति। It is problematic. So also with regards to the roots √kudri, √tatri and √matri.

Pre यन्त्रयति। यन्त्रति। Past Parti. Pass. यंत्रितः। Nouns:—यंत्रणा।

## स्फुडि ४ परिहासे।

स्फुण्डयति। इदित्करणात्स्फुण्डति। 'स्फुटि' इति पाठान्तरम्। स्फुण्टयति।

4. √sphuḍi, to jest, joke, laugh at The णिच् is optional, because of इदित्। Another reading is sphuṭi

Pre. स्फुण्डयति। स्फुण्डति। or स्फुण्टयति। स्फुण्टति।

## लक्ष ५ दर्शनाङ्कनयोः।

5. √laksha, 1. to notice, observe, see. 2. to mark, denote.

Pre. लक्षयति। Nouns:—लक्ष्मीः। लक्ष्मीवान्। लक्षणाः। लक्ष्य। लक्षणम्। लाक्षिकः। लाक्षणिकः।

## कुद्रि (कुद्र) ६ अनृतभाषणे।

कुन्द्रयति।

6 √kudri, to lie. Swâmi reads it with an indicatory अ as कुद्र। Then we have कोद्रयति। Aor. अचुकोद्रत्।

Pre. कुन्द्रयति। कुन्द्रति। Aor. अचुकुन्द्रत्।

## लड ७ उपसेवायाम्।

लाडयति।

7. √laḍ, to fondle, caress. The root is found in the Bhuâdi also, with the force vilâsa

Pre. लाडयति।

**मिदि (मिद्) ८ स्नेहने ।**

मिन्दयति-मिन्दति ।

8. √midi, to love; to be unctuous or greasy. The indicatory इ is to imply that णिच् is optional. The root is found in the Bhuâdi and Divâdi also.

Pre. मिन्दयति or मिन्दति ।

**ओलडि (उलडि) ९ उत्क्षेपणे ।**

ओलण्डयति-ओलण्डति । ओकार इदित्येके । लण्डयति-लण्डति । उकारादिरित्यन्ये । उलण्डयति ।

9. √oladi, to toss up, throw up. Some say that ओ is not part of the root, but indicatory. Some read it as उलडि beginning with उ u.

Pre. ओलण्डयति or ओलण्डति । or लण्डयति or लण्डति । or उलण्डयति or उलण्डति । Desid. ओलिलण्डयिषति ।

**जल १० अपवारणे ।**

'लज' इत्येके ।

10. √jala, to cover, screen. Some read it as लज √laja.

Pre. जालयति । लाजयति ।

**पीड ११ अवगाहने ।**

पीडयति ।

11. √pîḍa, to pain, torment. In the aorist, the shortening of the penultimate required by VII. 4. 1. S. 2314, is optional, in the case of this root, by the following sûtra.

**२५६५ । भ्राजभासभाषदीपजीवमीलपीडामन्यतरस्याम् । ७ । ४ । ३ ।**

एषामुपधाया ह्रस्वो वा स्याच्चङ्परे णौ । अपीपिडत्-अपिपीडत् ।

2565. The shortening of the penultimate of the णिच् ending stem, in the चङ् (reduplicated) Aorist, is optional in the following:—bhrâj, bhâs, bhâsh, dîp, jîv, mîl and pîd.

Thus अपीपिडत् or अपिपीडत् ।

Pre. पीडयति । Aor. अपीपिडत् or अपिपीडत् । Noun :—पीडा ।

**नट १२ अवस्यन्दने ।**

अवस्यन्दनं नाटयम् ।

12. √naṭa, to drop or fall. Avasyandana means dancing, or acting. The roots have many meanings, and so it means to hurt also when preceded by उत्, as चौरस्योन्नाटनम् under II. 3. 56 S. 617, where the verb governs the genetive. But that rule does not apply to the aorist, where we have the accusative, as चौरमुन्नीनटत् । See the Bhuâdi नट् No. 332, for the contrary opinion.

Pre. नाटयति । Aor. अनीनटत् ।

**श्रथ १३ प्रयत्ने ।**

'प्रस्थाने' इत्येके ।

13. √śratha, to make effort. Maitreya reads it as प्रस्थाने 'to go'. Many say it means great rejoicing. Some read the root श्रथि after this.

Pre. श्राथयति ।

**बध १४ संयमने ।**

बाधयति । 'बन्ध' इति चान्द्राः ।

14. √badha, to restrain. Chandra reads it as बन्ध । The root is found in the kryâdi also, as बध्नाति । The Bhuâdi बध is always सन् ending and so its form is बीभत्सते । That can never be confounded with this root. See Bhuâdi No. 973.

Pre. बाधयति ।

**पॄ १५ पूरणे ।**

पारयति । दीर्घोच्चारणं णिचः पाक्षिकत्वे लिङ्गं तदि सेट्कत्वाय । एवं पृणातिपिपर्तिभ्यां 'परिता' इत्यादिसिद्धावपि परति परत इत्यादिसिद्धिः फलम् ।

15. √prî, to fill. The long ॠ indicates by implication that the णिच् is optional and that the root is also सेट् । The result is that we have forms like परति and परतः in the present. Of course in the First Future also we have the alternative form परिता but then this can be derived either from the पॄ-पृणाति or पृ-पिपर्ति (See Kryâdi No. 19; and Juhotyâdi No. 4).

*Note* :—If the णिच् were invariably added, then there was no necessity of long ॠ, for short ऋ would also give the form पारयति । The only purpose that long ॠ serves is that the root becomes सेट् under the Kârikâ ऊदॄदन्तैः । &c.., (See S. 2258). Thus पृ+इट्+ता=परिता । But this form can be evolved from other roots also.

Pre. पारयति or परति । D. पारयतः or परतः ।

**ऊर्ज १६ बलप्राणनयोः ।**

16. √ûrja, to strengthen, to live, to breathe.

Pre. ऊर्जयति । Aor. और्जिजत् । Desid ऊर्जिजयिषति । Noun :—ऊर्क् ।

**पक्ष १७ परिग्रहे ।**

17. √paksha, to take; seize; to side with.

Pre. पक्षयति । Aor. अपपक्षत् ।

**वर्ण १८ चूर्ण १८ क । प्रेरणे ।**

'वर्ण वर्णने' इत्येके ।

18. √varṇa, to send.

Some read √varna varṇane, 'to describe,' and √chûrṇa preshaṇe 'to send or incite'.

Pre. वर्णयति ।

18A. √chûrṇa to powder.

Pre. चूर्णयति ।

प्रथ १९ प्रख्याने ।

प्राथयति । 'नान्ये मितोऽहेतौ' इति घटादिष्वस्यापाठान्न मित्त्वम् ।

19. √pratha to spread abroad, proclaim. This root is Bhuâdi also, and read there in the ghaṭâdi class which is मित् । See Bhuâdi No. 802. But the Churâdi pratha is not मित्, because under the gaṇa sûtra नान्ये मितो ऽहेतौ given under VII. 3. 36. S. 2570 further on, no other roots, except the five ज्ञप् &c. of the Churâdi class, in which णिच् is अहेतु *i.e.*, does not change the meaning of the root, are मित् । Therefore it is not मित् । We have always प्राथयति and never प्रथयति from this root.

In the aorist, the following sûtra ordains अ in the reduplicate instead of इ of VII. 4. 79 read with VII. 4. 93. (S. 2317 and 2316).

२५६६ । अत्स्मृदृत्वरप्रथम्रदस्तॄस्पशाम् । ७ । ४ । ९५ ।

एषामभ्यासस्याकारोऽन्तादेशः स्याच्चङ्परे णौ । इत्वापवादः । अपप्रथत् ।

2566. Short अ is substituted for the vowel of the reduplicate in the Reduplicated Aorist of the Causative, of the roots smṛi, dṛî, tvar, prath, mrad, stṛî and spaś.

*Note:*—Thus असस्मरत्, अददरत्, अतत्वरत्, अपप्रथत्, अमम्रदत्, अतस्तरत्, अपस्पशत् ॥ This debars the इ which would have come under VII. 4. 93. The *short* अ indicates that it is not to be lengthened by VII. 4. 94, as अददरत् ॥

This debars the इ of VII. 4 79. S. 2317. Thus अपप्रथत् ।

Pre. प्राथयति । Aor. अपप्रथत् ।

पृथ २० प्रक्षेपे ।

20. √pṛitha, to throw, cast. By the following sûtra, short ऋ is optionally substituted in the reduplicate of the aorist.

२५६७ । उर्ऋत् । ७ । ४ । ७ ।

उपधाया ऋवर्णस्य स्थाने ऋत् स्याद्वा चङ्परे णौ । इररारामपवादः । अपीपृथत्–अपपर्थत् ।
'पथ' इत्येके । पाथयति ।

2567. The short ऋ is optionally substituted for the penultimate ऋ of a Causative or णिच्—ending stem, in the reduplicated Aorist in चङ् ।

*Note.*—This debars the इर् (VII 3. 101), अर् (VII. 3. 86), and आर् (VII. 2. 114) substitutes. Thus अचिकीर्तत् (VII. 1. 101) or अचिकिर्तत् from कृत (Chur 111): अचकर्तत् (VII. 3. 86), or अचीकृतत्; अममार्जत् (VII. 2. 114) or अमीमृजत् ॥ Though the इर्, अर् and आर् substitutes are antaranga operations, they are prohibited by the express text of this sûtra. The short ऋ is substituted even for a long ॠ: the त् of ऋत् shows that, as in अचीकृतत् (VIII. 2. 77). In fact, this ऋ substitute does not take place after the operations of इर्, आर् and अर् substitutions have taken effect, but it is a form which suspends the operation of all those rules.

Thus अपीपृथत् or अपपर्थत् । Some read this root as पथ.

Pre. पार्थयति or पाथयति । Aor. अपपर्थत् or अपीपृथत् । अपीपथत् ।

**षम्ब (शम्ब) २१ (साम्ब) संबन्धने ।**

सम्बयति । अससम्बत् । शम्बच । अशशम्बत् । साम्ब इत्येके ।

21. √shamba, to collect, to heap together.

Maitreya reads after this—

**२१ क । शम्बच । अशशम्बत् ।**

The root शम्ब also has the same meaning. Some read it as साम्ब ।

Pre. सम्बयति । शम्बयति । Aor. अससम्बत् । अशशम्बत् । Noun :— सम्बरम् ।

**भक्ष २२ अदने ।**

22. √bhaksha, to eat.

Pre. भक्षयति ।

**कुट्ट २३ छेदनभर्त्सनयोः ।**

'पूरणे' इत्येके । कुट्टयति ।

23. √kutta, 1. to cut, divide. 2. to blame, censure. Some say it means 'fill' also.

Pre. कुट्टयति । Aor. अचुकुट्टत् । Nouns: कुट्टाकः । कुट्टाकी । कुट्टनं कुट्टः । कुट्टिमं ।

**पुट्ट २४ चुट्ट २४ क । अल्पीभावे ।**

24. √putta. 24A. √chutta, to become small, decrease.

Pre. पुट्टयति । Aor. अपुपुट्टत् ।

24A. √chutta.

Pre. चुट्टयति । Aor. अचुचुट्टत् ।

**अट्ट २५ षुट्ट २६ अनादरे ।**

अट्टयति । अयं दोपधः । दस्य चर्त्वस्यासिद्धत्वात् 'न न्द्राः–' (२४४६) इति निषेधः । आट्टिटत् ।

25. √Atta. 26. √shutta, to despise, contemn.

The root अट्ट has a penultimate द really. This द is changed to ट् by VIII. 4. 41 S. 113. The ट् substitution being considered asiddha the द is not reduplicated by the prohibition of VI. 1. 3 S. 2446. The टि is reduplicated. Thus आट्टिटत् । See also Bhuâdi अट्ट No. 273.

Pre. अट्टयति । Aor. आट्टिटत् ।

26. √shutta.

Pre. षुट्टयति । Aor. असुषुट्टत् ।

**लुण्ट २७ स्तेये ।**

लुण्टयति । 'लुण्टति' इति 'लुटि स्तेये' इति भौवादिकस्य ।

27. √lunt, to steal, rob, loot.

But the Bhuâdi लुटि स्तेये (No. 350) gives लुण्टति । What is the necessity of reading the Bhuâdi root with इ, when by reading the present root as लुटि we could have obtained the Churâdi and the Bhuâdi form लुण्टयति and लुण्टति by making the णिच् optional. This is for the sake of the लुट्

affix which would have been otherwise debarred by the चाक्यन् of III. I. 155. S. 3185 where कुपट is specifically mentioned. Under the present arrangement चाक्यन् of that sûtra applies to the pratipâdokta form कुपट of Churâdi, and not to the कुपि of Bhuâdi. Thus from Churâdi we have the noun कुपटाकः; but from Bhuâdi, we get the noun कुपिटत् ।

Pre. कुपटयति । Aor. अचुकुपटत् । Noun :—कुपटाकः fem. कुपटाकी ।

## शठ २८ श्वठ २९ असंस्कारगत्योः । श्वठि इत्येके ।

28. √śaṭha. 29 √śvaṭha, 1. to finish, 2. to go, move.

Some read it as श्वठि √śvaṭhi

Pre. शाठयति । श्वाठयति । श्वण्ठयति । Aor. अशीशठत् । अशिश्वठत् । अशश्वण्ठत् ।

## तुजि ३० पिजि ३१ हिंसाबलादाननिकेतनेषु ।

तुञ्जयति । पिञ्जयति । इदित्करणात्तुञ्जति । पिञ्जति । 'तुज' 'पिज' इति केचित् । 'लजि' 'लुजि' इत्येके ।

30. √tuji. 31. √piji 1. to hurt, kill, 2, to be strong or powerful; 3. to give, to take; 4. to live; dwell.

Because of the indicatory इ, the णिच् is optional. Some read these as तिज, and पिज others as लजि and लुजि । The Bhuâdi तुजि means 'to protect' also (See No. 264).

Pre. तुञ्जयति or तुञ्जति । Aor. अतुतुञ्जत् ।

31. √piji.

Pre. पिञ्जयति or पिञ्जति । Aor. अपिपिञ्जत् ।

## पिस ३२ गतौ ।

पेसयति । 'पेसति' इति तु शपि गतम् ।

32. √pisa, to go. The Bhuâdi पिस forms पेसति । (See No. 751).

Pre. पेसयति । Aor. अपीपिसत् ।

## षान्त्व ३३ सामप्रयोगे ।

33. √shântva, to pacify, appease.

Pre सान्त्वयति । Aor. अससान्त्वत् । Desid. सिसान्त्वयिषति ।

## श्वल्क ३४ वल्क ३५ परिभाषणे ।

34. √śvalka. 35. √valka to tell, narrate.

Pre. श्वल्कयति । Aor. अशश्वल्कत् ।

35. √valka.

Pre. वल्कयति । Aor. अववल्कत् ।

## ष्णिह ३६ स्नेहने ।

'स्फिट' इत्येके ।

36. √shniha to make unctuous; to cause to love.

Some read it as स्फिट । It is conjugated in the Divâdi also (See No. 91).

Pre. स्नेहयति । Aor. असिष्णिहत् ।

**स्मिट ३७ अनादरे ।**

अषोपदेशत्वान्न षः । असिस्मिटत् । 'स्मिङ् अनादरे' इत्येके । ङित्वस्यावयवेऽचरितार्थत्वाणिजन्तात्तङ् । स्माययते ।

37. √smiṭa to slight, scorn, despise.

As it is not taught with ष, there is no change of स into ष, as असिस्मिटत् । Some read it as स्मिङ् 'to slight' As the indicatory ङ् can have no meaning in a part of a root; it must therefore be taken to indicate that the णिजन्त root is âtmanepadî. As स्माययते । This is on the maxim अवयवे कृतं लिङ्गम् &c.

Pre. स्मेटयति । स्माययते । Aor. असिस्मिटत् । असिस्मियत् ।

**श्लिष ३८ श्लेषणे ।**

38. √ślisha to unite, join, connect.

The श्लेषति 'to burn' is Bhuâdi, and श्लिष्यति to embrace is Divâdi.

Pre. श्लेषयति । Aor. अशिश्लिषत् ।

**पथि ३९ गतौ ।**

पन्थयति–पन्थति ।

39. √pathi to go. The पथति is Bhuâdi. The indicatory इ makes it Bhuâdi पन्थति also.

Pre. पन्थयति or पन्थति । Aor. अपपन्थत् or अपन्थात् ।

**पिच्छ ४० कुट्टने ।**

40. √pichha to cut, divide.

Pre. पिच्छयति । Aor. अपिपिच्छत् ।

**छदि ४१ संवरणे ।**

छन्दयति–छन्दति ।

41. √chhadi to cover.

Pre. छन्दयति or छन्दति । Aor. अचछन्दत् ।

**श्रण ४२ दाने ।**

प्रायेणायं विपूर्वः । मित्त्वाणयति ।

42. √śraṇa to give, bestow. It is generally preceded by the preposition वि. This root is read in the ghaṭâ ii list also. The causative is therefore श्रणयति ।

Pre. विश्राणयति । Aor. व्यशिश्रणत् ।

**तड ४३ आघाते ।**

ताडयति ।

43. √taḍa to beat, strike.

Pre. ताडयति । Aor. अतीतडत् ।

**खड ४४ खडि ४५ क । कडि ४६ ख । भेदने ।**

खाडयति । खण्डयति । कण्डयति ।

44. √khaḍa 44A. √khaḍi, 44B. √kaḍi, to cut, divide.

Pre. खाडयति । खण्डयति or खण्डति । कण्डयति or कण्डति । Aor. अचीखडत् । अखण्डीत् or अचखण्डत् । अचकण्डत् or अकण्डीत् ।

**कुडि ४५ रक्षणे ।**

45. √kuḍi, to protect.

Pre. कुण्डयति or कुण्डति ।

**गुडि ४६ वेष्टने ।**

'रक्षणे' इत्येके । 'कुठि' इत्यन्ये । अवकुण्ठयति–अवकुण्ठति । 'गुठि' इत्यपरे ।

46. √guḍi to surround; envelop; cover. Some say it means to protect; some read the root as कुठि । others as गुठि ।

Pre. गुण्डयति or गुण्डति । अव कुण्ठयति or अव कुण्ठति ।

**खुडि ४७ खण्डने ।**

47. √khuḍi to break in pieces, to divide.

Pre. खुण्डयति or खुण्डति ।

**वटि ४८ विभाजने ।**

'वडि' इत्येके ।

48. √vaṭi to divide. Some read it as √vaḍi.

Pre. वण्डयति । वण्टयति । or वण्टति ।

**मडि ४९ भूषायां हर्षे च ।**

49. √maḍi 1. to adorn; 2. to rejoice. The मण्डते is Bhuâdi. There is a Bhuadi root मडि भूषायाम् (No. 314). So the इ in मडि of the present root is not to indicate that the णिच् is optional. Therefore we cannot have the form मण्डति meaning 'he rejoices.'

Pre. मण्डयति ।

**भडि ५० कल्याणे ।**

50. √bhaḍi to make fortunate. See Bhuâdi √bhaḍi No. 292.

Pre. भण्डयति or भण्डति ।

**छर्द ५१ वमने ।**

51. √chharda to vomit.

Pre. छर्दयति । Aor. अचच्छर्दत् ।

**पुस्त ५२ बुस्त ५२क । आदरानादरयोः ।**

52. √pusta. 52A. √busta, to regard; to disrespect, contemn.

Pre. पुस्तयति । बुस्तयति । Noun:—पुस्तकम् । पुस्तम् ।

**चुद ५३ संचोदने ।**

53. √chuda, to send, direct: to ask. When it means to ask, it takes two accusatives as देवदत्तमर्थं चोदयति ।

Pre. चोदयति । Nouns:—चूडा । चूडालः ।

**नक्क ५४ धक्क ५५ नाशने ।**

णोपदेशलक्षणे पर्युदस्तोऽयम् । प्रनक्कयति ।

54. √nakka. 55. √dhakka to destroy completely. The root begins with the dental न and is specially mentioned in the list of seven roots which do not change their न to ण See VI. 1. 65. S. 2286.

Pre. नक्कयति । प्रनक्कयति ।

55. √dhakka, to destroy.

Pre. धक्कयति ।

**चक्क ५६ चुक्क ५६ क । व्यथने ।**

56. √chakka. 56A. √chukka, to suffer, to inflict pain. Some texts read it as चिक्क √chikka.

Pre. चक्कयति । चुक्कयति ।

**क्षल ५७ शौचकर्मणि ।**

57. √kshala to wash, purify, cleanse.

Pre. क्षालयति । Aor. अचिक्षलत् ।

**तल ५८ प्रतिष्ठायाम् ।**

58. √tala, to establish.

Pre. तालयति । Aor. अतीतलत् । Nouns :—तालं । तलं ।

**तुल ५९ उन्माने ।**

तोलयति । अतूतुलत् । कथं 'तुलयति तुलना' इत्यादि । '–अतुलोपमाभ्याम्–' (६३०) इति निपातनादङन्तस्य तुलाशब्दस्य सिद्धौ ततो णिच् ।

59. √tula to weigh, measure. If the proper form is तोलयति, how do you explain the form तुलयति in the sentence तुलयति तुलना &c. The form तुलयति is derived from the noun तुला with णिच् under the gaṇa sûtra already mentioned before and to be taught hereafter (see root √कत्र sûtra 2573). The word तुला is formed by अङ् under the nipâtana of II. 3. 72. S. 630 where Pâṇini himself uses the word तुला । Thus तुला+णिच् (gaṇa sûtra) = तुलयति। But the aorist is अतुतुलत् । There is no lengthening of the reduplicate as a vowel has been elided.

Pre. तोलयति । Aor. अतूतुलत् । Nouns :—तुला । तुल्यम् ।

**दुल ६० उत्क्षेपे ।**

60. √dula, to swing

Pre. दोलयति । Aor. अदूदुलत् । Nouns :—दोला । दुलिः ।

**पुल ६१ महत्त्वे ।**

61. √pula, to be great, to be lofty, पोलति is BhuAdi.

Pre. पोलयति ।

**चुल ६२ समुच्छ्राये ।**

62. √chula, to raise, elevate.

Pre. चोलयति । Noun :—चोलः ।

**मूल ६३ रोहणे ।**

63. √mûla to plant, to grow, sprout.

Pre. मूलयति ।

कल ६४ विल ६५ क्षेपे ।

64. √kala. 65. √pila to hold, bear, carry. The form कल कलयति is from kathâdi कल. The कलते is Bhuâdi (No. 526).

Pre. कालयति ।

65. √pila or √vila. The Tudâdi root form is विलति ।

Pre. वेलयति or पेलयति । Nouns :—वेला ।

बिल ६६ भेदने ।

66. √bila to split, to divide. The Bhuâdi form is बेलति ।

Pre. बेलयति ।

तिल ६७ स्नेहने ।

67. √tila, to be unctuous or greasy, to annoint. The Tudâdi form is तिलति, and Bhuâdi तेलति । Pre. तेलयति ।

बल ६८ भृतौ ।

68. √bala, to live. Not in the Siddhânta. Instead of this we find there चल भृतौ । The Bhuâdi is बलति ।

Pre. बालयति ।

पाल ६९ रक्षणे ।

69. √pâla to protect.

Pre पालयति । Aor. अपीपलत् ।

लूष ७० हिंसायाम् ।

70. √lûsha, to hurt, injure.

Pre. लूषयति । Aor. अलूलुषत् ।

शुल्ब ७१ माने ।

शूर्प ७१ क । च ।

71. √śulba 1. to measure. 2. to create. Another reading is शूर्प 'śûrpa.'

Pre. शुल्बयति । शूर्पयति । Aor. अशुशुल्बत् । Noun :—शूर्प ।

चुट ७२ छेदने ।

72. √chuṭa to cut off, divide.

Pre. चोटयति or चुटति in Tudâdi.

मुट ७३ संचूर्णने ।

73. √muṭa to crush, break, powder.

Pre. मोटयति or मोटति in the Bhuâdi with the sense of 'to rub' or मुटति in Tudâdi No. 98.

पडि ७३ क । पसि ७४ नाशने ।

पण्डयति-पण्डति । पंसयति-पंसति ।

73A. √paḍi. 74. √pasi to destroy. The Bhuâdi form is पण्डते (No. 30).

Pre. पण्डयति or पण्डति । पंसयति or पंसति । Noun :—पांसुः ।

**वज ७५ मार्गसंस्कारगत्योः ।**

75. √vaja 1, to trim, prepare; 2. to go, move. Another reading is व्रज 'to go.' Swami reads it व्रज, मार्ग as two roots: namely vraj one, and mârga another root. In another text we find वज् व्रज् two roots. (See also Bhûâdi Nos. 271 and 272).

Pre. वाजयति । व्राजयति । मार्गयति ।

**शुल्क ७६ अतिस्पर्शने ।**

76. √śulka to gain; to pay, give: to touch.

Pre. शुल्कयति ।

**चपि ७७ गत्याम् ।**

चम्पयति–चम्पति

77. √chapi, to go, move.

Pre. चम्पयति or चम्पति ।

**क्षपि ७८ क्षान्त्याम् ।**

क्षपयति–क्षम्पति ।

78. √kshapi to endure.

Pre. क्षम्पयति or क्षम्पति ।

**क्षजि ७९ कृच्छ्रजीवने ।**

79. √kshaji, to live in distress or pain.

Pre. क्षञ्जयति or क्षञ्जति । Another form is with छ chh.

**श्वर्त ८० गत्याम् ।**

**श्वभ्र ८० क च ।**

80. √śvarta, 80A. √śvabhra, to go, move.

Pre. श्वर्तयति । श्वभ्रयति ।

**ज्ञप ८१ मिच्च ।**

अयं ज्ञाने ज्ञापने च वर्तते ।

81. √jñapa, 1. to know. 2. to inform. This root is मित् and it means to know and make others to know. Being a मित् root the following sûtra (S. 2568) applies.

**२५६८ । मितां ह्रस्वः । ६ । ४ । ९२ ।**

मितामुपधाया ह्रस्वः स्याण्णौ परे । ज्ञपयति ।

2568. The roots having an indicatory म्, retain their penultimate short vowel before the affix णि॥ The penultimate of मित् roots is shortened.

The मित् roots are घटादि a subdivision of Bhwâdi (800 to 873), and all other roots that end in अम् as गम् and वम् of the Divâdi class. Thus घटयति व्यथयति, जनयति, रजयति, शमयति, ज्ञपयति ॥ Some read the anuvṛitti of the, word 'optionally' from the last sûtra into this. This will then be a limited option only (vyavasthita-vibhâshâ). The forms उत्क्रामयति and संक्रामयते are thus explained.

Pre. चपयति Desid. चिचपयिषति । चीप्सति । Past Parti. Pass. चप्तः or चपितः ।

**यम ८२ च परिवेषणे ।**

चान्मित् । परिवेषणमिह वेष्टनम् । न तु भोजनं नापि वेष्टना । यमयति चन्द्रम् । परिवेष्टत इत्यर्थः ।

82. √yama cha. By force of च, this root is also a मित् । The word pariveshaṇa here means 'to move round' and not 'to feed'; or 'surround.' As यमयति चन्द्रम् "He moves round the moon." Pre. यमयति ।

**क्षप ८३ । (चह) ८३ क । परिकल्कने ।**

चहयति । अचीचहत् । कथादौ वक्ष्यमाणस्य तु अदन्तत्वेनाग्लोपित्वाद्दीर्घसन्वद्भावौ न । अचचहत् । 'चप' इत्येके । चपयति ।

83. √kshapa to miss, to deceive. Not in the Siddhanta.

83A. √chaha, to deceive. This root is read in the kathâdi list also, as will be taught further on. The result is that as it ends with अ, which is however elided: therefore it becomes अग्लोपित् and consequently VII. 4. 93. S. 2316 does not apply and so there is no lengthening under S. 2318 or Sanbadbhava in the aorist. As अचचहत् ।

Maitreya reads the root as √चप and he gives the example चपयति ।

Being मित्, we have the Passive aorist अचहि or अचाहि with चिण् and चाहिचाहं with णमुल् । Pre. चहयति । Aor. अचीचहत् ।

**रह ८४ त्यागे ।**

इत्येके । अरीरहत् । कथादिस्तु अररहत् ।

84. √raha to quit, leave, abandon. This will also be found in the kathâdi, and the aorist there will be अररहत्, while the aorist here is अरीरहत् ।

Pre. रहयति । Aor. अरीरहत् ।

**बल ८५ प्राणने ।**

बलयति ।

85. √bala to strengthen; to live. Pre. बलयति ।

**चिञ् ८६ चयने ।**

86. √chiñ to collect, gather. Thus चि + णिच् + शप् + तिप् = चै + णिच + शप् + तिप् । Now applies the following sûtra.

**२५६९ । चिस्फुरोर्णौ । ६ । १ । ५४ ।**

आत्वं वा स्यात् ।

**2569. There is optionally the substitution of आ in the room of the diphthong of the roots चि and स्फुर when the affix णिच् is added.**

**Thus चै + णिच् + शप् + तिप् = चा + णिच् + शप् + तिप् ।**

**Now applies the following sûtra by which a प् is inserted.**

२५७० । अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ । ७ । ३ । ३६ ।

चपयति-चययति । जित्करणसामर्थ्यादस्य णिज्विकल्पः । चयते । प्रणिचपयति-प्रणिचययति । 'नान्ये मितोऽहेतौ' । अहेतौ स्वार्थे णिचि ज्ञपादिभ्योऽन्ये मितो न स्युः । तेन शमादीनामन्तत्वमप्युक्तं मित्वं न ।

2570. The augment पुक् (प्) is added to the roots ऋ, ह्री, व्ली, री, क्नूय्, क्ष्माय्, and to a root ending in long आ, when the affix णि follows.

Thus चा+प्+णि+अ+ति=च+प्+णि+अ+ति S. 2568. Because the root is मित्)=चपयति । When there is no आत्व of S. 2569, we have चययति ।

The root चि has an indicatory ञ् which shows that णिच् is optional. Therefore without णिच् we have चयति or चयते ।

So also प्रणिचपयति or प्रणिचययति ।

नान्ये मितोऽहेतौ ।

*Gaṇa sutra.*—Except these (jñap, yama, chaha, chapa, raha, bala and chi) no other roots of this churâdi class are मित्।

The word अहेतौ means 'without the causative force'—the class where णिच् is added as svârtha, *i.e.*, the Churadi class. Therefore the roots शम् &c., though ending in अम् will not be मित् under the gaṇa sûtra जनीजृष (See S. 2353) See S. 2352 also Pre. चपयति or चययति or चयति ।

घट्ट ८७ चलने ।

87. √ghaṭṭa to shake, stir about. Pre. घट्टयति । The Bhuâdi form is घट्टते ।

मुस्त ८८ संघाते ।

88. √musta to heap up, gather, accumulate. Mâdhavîya reads here अस्तयति ।

खट्ट ८९ संवरणे ।

89. √khaṭṭa to cover, screen. Pre. खट्टयति ।

षट्ट ९० स्फिट्ट ९१ चुबि ९२ हिंसायाम् ।

90. √shaṭṭa. 91. √sphiṭṭa. 92. √chubi to injure, kill.
Pre. सट्टयति ।

91. √sphiṭṭa. Pre. स्फिट्टयति ।

92. √chubi.
Pre. चुम्बयति (or चुम्बति Bhuadi 'to kiss.')

पुस, व्युष ९३ पुल ९४ संघाते ।

'पुर्ण' इत्येके । 'पुण' इत्यन्ये ।

93. √pusa. 94. √pûla to collect. Some read पुर्ण √purṇa. Others read पुण √puṇa. Some read √vyus for √pus.

94. √pûla. Pre. पूलयति ।

**पुंस ९५ अभिवर्धने ।**

95. √pumsa ' to crush, grind ; to trouble. Pre. पुंसयति ।

**व्यप (व्यय) क्षेपे ९६ टकि ९७ बन्धने ।**

टङ्कयति-टङ्कति ।

96. √vyapa, to throw. This root is not in the Siddhânta.

97. √ṭaki to bind, tie, fasten.

Pre. टङ्कयति or टङ्कति । Nouns :—टङ्का । विटङ्कः ।

**धूस ९८ कान्तिकरणे ।**

धूसयति । दन्त्यान्तः । 'मूर्धन्यान्तः' इत्येके । 'तालव्यान्तः' इत्यपरे ।

98. √dhûsa, to adorn, decorate. The sibilant is dental (स). Some say it is cerebral (ष) Others say it is palatal (श).

Pre. धूसयति । Noun :— धूसरः ।

**कीट ९९ वर्णे ।**

99. √kîṭa 1. to tinge or color, 2. to bind. Pre. कीटयति ।

**चूर्ण १०० संकोचने ।**

100. √chûrṇa, to contract, to close, shrink. The repetition of √churṇa is for the sake of different meaning.

Pre. चूर्णयति ।

**पूज १०१ पूजायाम् ।**

101. √pûja, to worship. Pre. पूजयति । Noun :—पूजा ।

**अर्क १०२ स्तवने ।**

'तपने' इत्येके ।

102. √arka, 1. to heat, warm. 2. to praise. Some read तपने instead of स्तवने । तपन means 'heating.' Pre. अर्कयति ।

**शुठ १०३ आलस्ये ।**

103. √śuṭha, to be idle or lazy.

Pre. शोठयति । The Bhuâdi form is शोठति (No. 364).

**शुठि १०४ शोषणे ।**

शुण्ठयति-शुण्ठति ।

104. √śuṭhi to be dry.

Pre. शुण्ठयति or शुण्ठति । The root शुण्ठ is read in the Bhuâdi also. (No. 365). This root would have given the form शुण्ठति । The Bhuâdi शुण्ठ is rather superfluous.

**जुड १०५ प्रेरणे ।**

105. √juḍa, to send.

Pre. जोडयति। The form जुडति is Tudâdi (No. 85).

**गज १०६ मार्ज १०७ शब्दार्थौ ।**

गाजयति । मार्जयति ।

106. √gaja. 107. √mârja to sound, roar.

Pre. गाजयति or गाजयते । The Bhuâdi forms are गजति, गर्जति and मृजति । (Nos. 265, 266 and 267).

**मर्च १०७ क । च ।**

मर्चयति ।

107. √mârja. 107(*a*). √marcha to sound.

Pre. मार्जयति । मार्चयति । Bhuâdi मर्चति ।

**घृ १०८ प्रस्रवणे ।**

'स्रावणे' इत्येके ।

108. √ghṛi to sprinkle over, wet, moisten. Some read स्रावणे instead of प्रस्रवणे ।

Pre. घारयति । The Bhuâdi is घरति । The juhotyadi is जिघर्ति । (See No. I. 985 and No III. 14).

**पचि १०९ विस्तारवचने ।**

पञ्चयति । 'पञ्चते' । इति व्यक्तार्थस्य अपि गतम् ।

109. √pachi, to explain fully, dilate upon, amplify.

Pre. पञ्चयति or पञ्चति । In the Bhuâdi पञ्चते has been taught (No. 187).

**तिज ११० निशाने ।**

तेजयति ।

110. √tija, to sharpen. Pre तेजयति । The Bhuâdi form is तेजति ।

**कृत १११ संशब्दने ।**

111. √krîta, 1. to mention, utter, 2. to name, call. Thus कृत + णिच् + शप् + ति । Now applies the following sûtra by which the ऋ is changed to इ र् ।

**२५७१ । उपधायाश्च । ७ । १ । १०१ ।**

धातोरुपधाभूतस्य ॠत इत्स्यात् । रपरत्वम् । 'उपधायां च' (२२६५) इति दीर्घः । कीर्तयति । 'उर्ऋत्' (२५६७) । अचीकृतत्–अचिकीर्तत् ।

2571. इ is also substituted for the penultimate long ॠ of a root: and thereby र् is added to इ by I. 1. 51. S. 70.

As कीर्तयति, कीर्तयतः, कीर्तयन्ति; from कृत ॥ The lengthening is by VIII. 2. 78. S. 2265.

Pre- कीर्तयति । Aor. अचीकृतत् or अचिकीर्तत् (See VII. 4. 7. S. 2567).

**वर्ध ११२ छेदनपूरणयोः ।**

112. √vardha, 1. to cut, divide, 2. to fill. Pre. वर्धयति । Aor. अववर्धत् ।

**कुबि ११३ आच्छादने ।**

कुम्बयति । 'कुभि' इत्येके ।

113. √kubi, to cover. Some read कुभि √kubhi.
Pre. कुम्बयति or कुम्बति । कुम्भयति or कुम्भति । Noun :—कुम्बा ।

लुबि ११४ तुबि ११५ अदर्शने ।
'अर्दने' इत्येके ।

114. √lubi, (to torment, harass). 115. √tubi to become invisible to hurt, trouble. Instead of 'adarshane,' another reading is 'ardane'.
Pre. लुम्बयति ।
115. √tubi 'to disappear'. Pre. तुम्बयति ।

ह्रप ११६ व्यक्तायां वाचि ।
'क्लप' इत्येके ।

116. √hlapa to speak, to sound, to creak. Some read it √klapa.
Pre. ह्रापयति । क्लापयति ।

चुटि ११७ छेदने ।

117. √chuṭi to cut, divide. Pre. चुण्टयति or चुण्टति ।

मृडि, तुडि ११८ इल ११९ प्रेरणे ।
एलयति । ऐलिलत् ।

118. √mṛiḍi. √tuḍi 119. √ila to send. The √mṛiḍi is apparently wrong according to Mâdhava and it is not given in the Siddhânta. nor is √tuḍi.
119. √ila. Pre. एलयति । Aor. ऐलिलत् ।

म्रक्ष १२० म्लेच्छने ।

120. √mraksha (1. to smear, annoint. 2. to accumulate) 3. to speak indistinctly. Pre. म्रक्षयति ।

म्लेच्छ १२१ अव्यक्तायां वाचि ।

121. √mlechha, to speak confusedly, barbarously.
Pre. म्लेच्छयति । The BhuAdi form is म्लेच्छति ।

व्रूस १२२ वर्ह १२३ हिंसायाम् ।
केचिदिह गर्ज गर्द शब्दे । गर्ध अभिकाङ्क्षायां चिति पठन्ति ।

122. √vrûsa. 123. √varha, to injure, kill. Some read here √garja and √garda 'to make sound', and √gardha 'to desire'.
Pre. व्रूसयति ।
123. √varha. Pre. वर्हयति ।

गर्ज गर्द १२४ शब्दे ।

124. √garja, √garda to sound. Pre. गर्जयति । गर्दयति ।

गर्ध १२५ अभिकाङ्क्षायाम् इति पठन्ति ।

125. √gardha, to be desirous or greedy. Pre. गर्धयति ।

गुर्द १२६ पूर्वनिकेतने ।

126. √gurda. 127. √ ourva, to dwell, inhabit. Some do not read

पूर्व as a separate root but make it part of the meaning, as purvanikatane 'former dwelling place'. Pre. पूर्वयति ।

पुर्व (पूर्व) १२७ निकेतने ।

127. √purva. Pre. पूर्वयति ।

जसि १२८ रक्षणे ।

'मोक्षणे' इति केचित् । जंसयति-जंसति ।

128. √jasi, to protect, to liberate. Instead of rakshaṇe, Deva reads it mokhshaṇe. Pre. जंसयति or जंसति । The Divâdi form is जस्यति ।

ईड १२९ स्तुतौ ।

129. √îḍa, to praise.
Pre. ईडयति । The adâdi form is ईट्टे । Aor. ऐडिडत् ।

जसु १३० हिंसायाम् ।

130. √jasu to injure, to kill.
Pre. जासयति । Past Parti. Pass. जस्तः । Ger. जसित्वा or जस्त्वा ।

पिडि १३१ संघाते ।

131 √piḍi, to heap or accumulate. Pre. पिण्डयति or पिण्डति ।

रुष १३२ रोषे ।

'रुट' इत्येके ।

132. √rusha, to be angry. Some read it as √ruṭ.
Pre रोषयति । The Bhuâdi form is रोषति । The Divâdi is रुष्यति ।

डिप १३३ क्षेपे ।

133. √ḍipa, to throw, cast. Pre. डेपयति ।

ष्टुप १३४ समुच्छ्राये ।

134. √shṭûpa, to heap up, to erect, raise. Pre. स्तूपयति ।

आकुस्मादात्मनेपदिनः । कुस्मनाम्नो वा इति वक्ष्यते
तस्मिन् व्याप्येत्यर्थः । अकर्तृगामि फलार्थमिदम् ॥

Sub-section II. upto the √kusma, are Atmanepadis. The √kusma will be taught later on. All the roots taught hereafter and including √kusma are Atmanepadis. This is in order to make these roots Atmanepadis when the fruit of the action does not accrue to the agent.

चित १३५ संचेतने ।

चेतयते । अचीचितत ।

135. √chita, to perceive, to understand.
Pre. चेतयते । The Bhuâdi form is चेतति (See No. 39). Aor. अचीचितत ।

दशि १३६ दंशने ।

दंशयते । अददंशत । इदित्वाण्णिजभावे । दंशति । आकुस्मीयमात्मनेपदं णिजन्तेष्वेवेति व्याख्यातारः । नलोपे वञ्चित्वादर्थाद्भ्वादेरेव ग्रहणम् ।

136. √daśi, to bite.

Pre. दंशयति। As the root has an indicatory इ, the णिच् is optional, and when there is no णिच्, the form is दंशति। It is Parasmaipadî because the Atmanepada ordained by the rule that all roots up to √kusma, are Atmanepadi, is confined to णिच् ending roots only and not when those roots do not take the affix णिच्. This is the opinion of all the commentators. When there is the elision of न, the root is Bhuâdi, because it is read along with √sañj. In other words the elision of the nasal of दंश ordained by VI. 4. 25. S. 2396, is confined to the √dans of the Bhuâdi class and not to the present root which is also optionally conjugated in the Bhuâdi class. Therefore here we have दंशति, while the root belonging to the Bhvâdi class is conjugated as दशति। Pre. दंशयते। Aor. अददंशत्।

दसि १३७ दर्शनदंशनयोः।

दंसयते–दंसति। 'दस' इत्यप्येके।

137. √dasi, 1. to see. 2. to bite. Some read this root as dasa without इ. It is found in the Divâdi class also as दस्यति।

Pre. दंसयते or दंसति। Nouns:—दासः। दास्री।

डप १३८ डिप १३८ क। संघाते।

138. √ḍapa, √ḍipa to collect, accumulate. The Parasmai डेपयति has already been taught before. The root has a different meaning there.

Pre. डापयते। डेपयते।

तत्रि १३९ कुटुम्बधारणे।

तन्त्रयते। चान्द्रा धातुद्वयमिति मत्वा 'कुटुम्बयते' इत्युदाहरन्ति।

139. √tattri to support or maintain (as a family). Chândrâ says that तत्रि and कुटुम्ब are two different roots and so he gives the example of कुटुम्बयते। Pre. तन्त्रयते or तन्त्रति। Noun:—तन्त्रम्।

मत्रि १४० गुप्तपरिभाषणे।

140. √mattri, to consult, to give advice, to mutter; to speak in secrecy. Pre. मन्त्रयते। P. मन्त्रति।

स्पश १४१ ग्रहणसंश्लेषणयोः।

141. √spaśa, to take 2. to unite.

Pre. स्पाशयते। स्पशति। Aor. अपस्पशत।

तर्ज १४२ भर्त्स १४३ तर्जने।

142. √tarja. 143. √bhartsa, to threaten, menace.

Pre. तर्जयते। भर्त्सयते।

बस्त १४४ गन्ध १४५ अर्दने।

बस्तयते। गन्धयते।

144. √vasta. 145. √gandha, to torment.

Pre. बस्तयते। गन्धयते।

विष्क १४६ हिंसायाम्।

'हिष्क' इत्येके।

146. √vishka, to injure, to hurt. Some read it as हिष्क giving the example of हिष्कयते । Pre. विष्कयते ।

निष्क १४७ परिमाणे ।

147. √nishka, to weigh, measure.
Pre. निष्कयते । Nouns :—निष्कः । नैष्किकम् ।

लल १४८ ईप्सायाम् ।

148. √lala, (to fondle), to desire.
Pre. लालयते । Aor. अलीललत । Nouns :—कुलालः । कौलालिका ।

कूण १४९ संकोचे ।

149. √kûṇa, to contract, close. Some read the root as कुण, but it is not approved, for the √kuṇa will be taught in the kathâdi class. The Tudadi form is कुणति । Pre. कूणयते । Noun :—कूणिः ।

तूण १५० पूरणे ।

150: √tûṇa, to fill, fill up. Pre. तूणयते । Nouns :—तूणः । तूणीरः ।

भ्रूण १५१ आशाविशङ्कयोः ।

151. √bhrûṇa, 1. to hope 2. to fear. Pre भ्रूणयते । Noun :—भ्रूणः ।

शठ १५२ श्लाघायाम् ।

152. √śaṭha, to praise, to boast. Pre. शाठयते ।

यक्ष १५३ पूजायाम् ।

153. √yaksha, to worship. Pre. यक्षयते ।

स्यम १५४ वितर्के ।

154. √syama, to consider, reflect. Syamate is Bhuâdi form, the meaning differs from the present root. Pre. स्यामयते ।

गूर १५५ उद्यमने ।

155. √gûra, to make an effort or exertion. Some read it as गुरी, but this is not an approved reading. Pre. गूरयते ।

शम १५६ लक्ष १५७ आलोचने ।

'नान्ये मितः-' इति मित्त्वनिषेधः । शामयते ।

156. √śama, 157. √laksha, to see, look at, inspect, display. Though the root शम ends in अम, it is not मित् because of the prohibition, no other roots of the Churâdi class are मित् except the seven *viz*, ज्ञप &c. Therefore we have शामयते but never शमयते । Pre. शामयते । लक्षयते ।

कुत्स १५८ अवक्षेपणे ।

158. √kutsa, to abuse, revile. Pre. कुत्सयते ।

त्रुट १५९ छेदने ।

'कुट' इत्येके ।

159. √truṭa, to cut, divide. Some read it as कुट. This root is found in the Tudâdi class also. Pre. त्रोटयते ।

गल १६० स्रवणे ।

160. √gala, to flow. Pre. गालयते । The Bhuâdi form is गलति ।

भल १६१ आभण्डने ।

161. √bhala, (to see, behold); to expound, explain. Pre. भालयते ।

कूट १६२ आप्रदाने ।

'अवसादने' इत्येके ।

162 √kûṭa, to abstain from giving; to censure. According to some, it means also to be distressed. Some read it as कुट प्रतापने meaning to burn. The form will be कोटयते । Pre. कूटयते ।

कुट्ट १६२ क । प्रतापने ।

162A. √kuṭṭa, to burn, कुट्टयते । This is found in the kathâdi also.

वञ्चु १६३ प्रलम्भने ।

163. √vanchu, to cheat, deceive, defraud. According to Haradatta, the root has an indicatory long ऊ. The root is Parasmaipadi in certain senses.

Pre. वञ्चयते । वञ्चति । (Because the इट् is optional before क्त्वा by the force of the indicatory ऊ, therefore the निष्ठ् is optional. The reasoning is the same as in the case of the इरित् roots of this class.) Inten. वनीवच्यते (VII. 4. 84. S. 2642). Past Parti. Pass. वक्तम् । Ger. वञ्चित्वा or वचित्वा (I. 2. 24. S. 3325) or वक्त्वा ।

वृष १६४ शक्तिबन्धने ।

शक्तिबन्धनं प्रजननसामर्थ्यं शक्तिसंबन्धश्च । वर्षयते ।

164 √vṛisha, to be powerful or eminent. 2. To have the power of production. The words शक्तिबन्धने mean both 'the power of procreation,' and 'to be powerful.' The forms वर्षति and वर्षते are Bhuâdi from different roots Pre. वर्षयते ।

मद् १६५ तृप्तियोगे ।

मादयते ।

165. √mada, to please, gratify. Pre. मादयते ।

दिवु १६६ परिकूजने ।

166. √divu, to suffer pain, lament, moan. Pre. देवयते । Noun :— परिदेवकः ।

गृ १६७ विज्ञाने ।

गारयते ।

167. √gṛî, to make known, relate, teach. The form गिरति is Tudâdi from √gṛi (No. 117); गृणाति (kryâdi 28) गरति (Bhuâdi No. 984). Pre. गारयते ।

**विद् १६८ चेतनाख्याननिवासेषु ।**

वेदयते ।

सत्तायां विद्यते ज्ञाने वेत्ति विन्ते विचारणे ।

विन्दते विन्दति प्राप्तौ श्यन्लुक्श्नम्शेष्विदं क्रमात् ॥

